vedānta darśanam

वेदान्तदर्शनम्



dr. r. karunakaran

ABOUT THE BOOK

A re-evaluation of the Vedanta Philosophy of Sri Śaṅkara, Sri Rāmānuja and Sri Madhva and their followers is needed for a 20th Century world-awareness and action-orientation, for, the views of these great teachers of Vedanta were usually misunderstood by the orthodox scholars and materialists. The present work, *Vedanta Darsanam*, is a unique work in Sanskrit on the Vedanta Philosophy and religion of the great teachers on Advaita, Viśiṣṭādvaita and Dvaita with the visions of Vedanta-Darśanamālā of Sri Nārayṇa Guru.

The author critically evaluates vedanta philosophy and explains that Religion (Dharma) is the realization of the oneness of the self (Ātman) i. e. Brahman, the ultimate truth. Sri Śaṅkara does not disregard the world. He advocates that the world is also useful and dedicated action (Karma yoga) is very essential for the welfare of the world and the release of the self.

Dr. R. Karunakaran proves that the dualists and materialists also can appreciate and accept the application of the Advaitic way of life even in the modern world. He critically evaluates the views of the great Sages in India and co-ordinates the views of the materialists with the Vedantic vision. He convincingly explains and establiblishes that Vedanta has an intimate link with life. Sri Nārāyaṇaguru a follower of Sri Śaṅkara showed the practical application of the Advaitic way of life to humanity.

This book is instructive and interesting to scholars and students in India and abroad.

Price Rs. 25.

वेदान्तदर्शनम्

VEDĀNTA DARŚANAM


VISION OF VEDĀNTA

Advaitavedantasiromani

R. KARUNAKARAN, M.A., D.R.M.S., Ph.D.

Reader in Sanskrit, University of Kerala

Former Professor & Head of the P. G. Department of Vedanta, Government Sanskrit College, Trivandrum; Professor of Sanskrit, Government Sanskrit College, Pattambi and Principal Kendriya Sanskrit Vidyapeetham, Tirupati & Puri under Rashtriya Sanskrit Sansthan, Ministry of Education, Government of India.



SRI SANKARA SANSKRIT VIDYAPEETHAM

EDAKKADOM, QUILON, S. INDIA.

Sri Sankara Sanskrit Vidyapeetham Publication Series No. 2.

General Editor:
Dr. T. R. Sarangahadharan Tholoor, B.Sc., B.A.M.

By the same author
The Concept of Sat in Advaita Vedanta
Darśanamālā of Sri Narayana Guru
(*Critical edition with the commentary 'Advaitadarśanam'*)

Publishers:
Sri Sankara Sanskrit Vidyapeetham,
Edakkadom P. O., Ezhukone,
Quilon District, Kerala.

First Edition 1980

Deluxe Edition Rs. 25/-
Popular Edition Rs. 10/-

Printed in India at Rāshtravāṇi Mudraṇālaya, Trivandrum-14.

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

ORIENTAL RESEARCH INSTITUTE
AND MANUSCRIPTS LIBRARY,
KARIAVATTOM P. O.,
TRIVANDRUM.



FOREWORD

Dr. R. Karunakaran has described the central doctrines of Advaita, Visiṣṭādvaita and Dvaita in the earlier pages of the volume. Towards the close he has attempted a synthesis and a path of pragmatic unity. Perhaps this is needed for a XX^th^ Century world – awareness and action – orientation. The book is worth perusing.

Sd/-
Dr. K. Raghavan Pillai,
Director and Professor of Sanskrit,
University of Kerala.

ORI and MSS Library,
14.11.80.

PREFACE

As a student and teacher of Vedanta, I felt the necessity to re-evaluate the Vedanta Philosophy of Sri Śaṅkara, Sri Rāmānuja Sri Madhva and their followers, for, their views were usually misunderstood by the orthodox scholars and materialists. *Vedanta-Darśana* is a unique work in Sanskrit on the Vedanta Philosophy and religion of the great teachers on Advaita, Viśiṣṭādvaita and Dvaita. It is necessary for the modern world to unite the ways of approach of the great philosophers in India, on the authority of the Vedas and the Upaniṣads. Sri Buddha who showed the spirit and light of the Vedanta Philosophy is the sole source of inspiration to Indian Philosophy. The *Advaya* (not two) doctrine of Buddhism perhaps inspired Sri Śaṅkara to establish the oneness of the selves and the Universal Religion, on the authority of Vedanta. Religion is the realisation of the oneness of the Ātman, i.e., Brahman, the Ultimate Truth. *AdvaitaDarśanam* accepts God, world and self, as real on the empirical level; the blessing of God is also useful for the release of the self from the blemishes of Saṁsāra, i.e.. Worldly life. Śaṅkara advocates that world is also useful and dedicated action (*Karmayoga*) is very essential for the welfare of the world and for the release of the self, in the way of life of Advaitins. The Dualists and materialists also can appreciate and accept the application of the Advaitic way of life to humanity. An Advaitin alone advocates that we can see God in the poor and weak, and that there is only one Religion, one God, one Caste for whole humanity, to solve the problems of life. Thus religious teachers and even dedicated materialists can appreciate and accept *Vision of Vedanta* as an authority, in the pursuit of the welfare of the world and the release of the self. I may humbly submit this book to the scholars and common people in the hope that it will help them to evaluate the views of the great sages in India.

I am deeply indebted to my respected teacher, Dr. K. Raghavan Pillai, Professor of Sanskrit and Director of the Oriental Research Institute and Dean of the Oriental Faculty, University of Kerala, who has kindly accepted my request to write the foreword to this book. I humbly dedicate this work to him, as a token of my gratitude for the continuous inspiration he gave me in this work. I am grateful to Prof. R. Vasudevan Potti and Sri G. Balakrishnan Panicker, Technical Officer, University of Kerala, for their help in the completion of this post--doctoral work.

Trivandrum,
20.11.1980.

Dr. R. Karunakaran.

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

वेदान्तदर्शनम्

प्रथमोऽध्यायः

सत्यदर्शनम् ।

ब्रह्मस्वरूपाय तत्त्वाय ते नमः ।
सत्यस्वरूपाय नित्यं नमो नमः ॥

लोके महात्मनां जीवनमवलोकनञ्च सत्याभिमुखतया भवति । "सत्यान्न प्रमदितव्यम्"[1] इति श्रुतिः अभ्युदयाय निःश्रेयसाय सत्यप्रमादाभावं सत्याभिमुख्यं च उपदिशति ।

सत्यदर्शिनां महात्मनां निवासस्थानत्वादेव भारतस्य महत्वमुपवर्ण्यते । भौतिकविज्ञानोन्नत्या प्रायेण इतरे देशा समानास्तथाऽपि न ते स्वास्थ्यमुपलभन्ते । सत्यसाक्षात्काराभाव एव दुःखस्य कारणम् । सर्वदुःखनिवृत्तये सत्यसाक्षात्कारः आवश्यको भवति । सत्यदर्शिनां श्रीबुद्धश्रीशङ्करश्रीरामानुजश्रीमध्वाचार्य-श्रीनिम्बार्कश्रीवल्लभश्रीरामकृष्णश्रीविवेकानन्दश्रीनारायणगुरुश्रीचट्टम्बिस्वामि-महात्मागान्ध्यादिमहात्मनां जन्मना तथा तेषां सत्याभिमुखजीवितसरण्या च भारतं पवित्रितं लोकराष्ट्रेषु मध्ये आदरास्पदं च भवति ॥

---

1. तै., I, 11.

मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये ।
यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वतः ॥[2]

इति भगवद्वचनेन न सर्वे तत्त्वदर्शनकुतुकिनः; परं तु केषाञ्चिदेव सत्यसाक्षात्काराय यत्नः स्यात्, तेष्वपि कश्चिदेव तत्त्वदर्शी स्यात्[3] इति अवगम्यते ।

"वासुदेवः सर्वमिति स महात्मा सुदुर्लभः" इति सर्वमेकमेवेति, "एकं सत्" "स्वधया तदेकम्" इति वेदबोधितं च "अस्तीति भासमानम्" 'सत्' सत्यम् । केवलम् एकं सत् ब्रह्मात्मस्वरूपम् आचार्यवतां पुरुषाणाम् अपरोक्षविषयं भवति ॥[4]

"आचार्याः शङ्कराचार्याः मतमद्वैतमेव च ।"

कोऽहमिति प्रधानः प्रश्न एव तत्त्वशास्त्रस्य आधारभूतः । कुत आयातः, कुत्र गच्छामीत्यादिप्रश्नास्तु तदनु संभविष्यन्ति ।

का ते कान्ता कस्ते पुत्रः
संसारोऽयमतीव विचित्रः ।
कस्य त्वं कुत आयात-
स्तत्त्वं चिन्तय यदिह भ्रातः ॥[5]

इति शङ्कराचार्याणां भजगोविन्दपद्यमेव तत्त्वसाक्षात्काराय उत्तेजकं भवति । तथा च आचार्यैस्तु अनित्येऽस्मिन् संसारे मिथ्यात्वप्रदर्शनपुरस्सरं वैराग्यप्रतिपत्त्यर्थं विषयः प्रदर्श्यते ।

यावत् आत्मनि अहन्ताधिष्ठितबुद्धिर्भवति तावदेव लौकिकबन्धस्य सत्यत्वं दृश्यते ।[6] कुटुम्बबन्धस्य लौकिकस्य तावत् नित्यसत्यत्वं नास्ति । न कोऽपि संसारी पूर्णसुखमनुभवति । मध्येऽपि सुखस्य हानिर्भवेत् नवेति शङ्काजनितदुःखानुभवदर्शनात् । एवञ्च विषयसंसर्गजं सुखं दुःखसंस्पृष्टमेव ।

---

2. गीता., VII, 3.
3. "बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते" गीता., VII, 19.
4. "आचार्यवान् पुरुषो वेद" छा., VI, xiv, 2.
5. भज. गो., 8.
6. "प्रमाणं त्वात्मनिश्चयात्" वे. प., P,5

तच्च विनाशि । ततः शाश्वतं सुखं कथमुपलभ्यते इति बुद्धिमतां चिन्ता स्यात् । आपेक्षिकं सुखं न नित्यं भवति । किन्तु आत्मविषयकम् अपरोक्षमेव ज्ञानं भयनिवारकं नित्यसुखदायकं च भवेत् । ततः शाश्वतसुखान्वेषणपरः स्वतः वेदान्तशास्त्रमनुसृत्य तत्त्वान्वेषी स्यात् । तथा च सर्वदुःखनिवृत्तये निरतिशयानन्दलाभाय आत्मतत्त्वनिर्णयाय[7] च वेदान्तशास्त्रमेव[8] शरणम् ।

अहं ममेति प्रतीत्यनुसारेण कुटुम्बिनी कान्ता भवतीति बुद्धिर्भवति । भार्यादिसंबन्धः स्वसुखापेक्षामाश्रित्यैव वर्तते । स्वसुखाभावे सोऽपि बन्धः विनष्टः स्यात् । तथा च कुटुम्बसंबन्धस्तावद् आपेक्षिकः न तु नित्यः । लोके अहं ममेत्याद्यध्यासवशादेव संसारबन्धः प्रतीयते । नहि सुषुप्तौ भार्यादिबन्धः अनुभूयते । तदा तत्र लौकिकस्य आपेक्षिकस्य सुखस्य ग्रहणमेव नास्ति । यथा वा स्वप्नेभार्यापुत्राद्युपलब्धिस्तथैवाऽत्रापि अध्यासवशात् भार्यादिसंबन्धः प्रतीयते । तथा च अन्तश्चेतसा कल्पितः स्वप्नप्रपञ्चः यथा वा प्रबोधे मिथ्या भवतीति विज्ञायते तथैव बहिश्चेतःपरिकल्पितं जगदपि मिथ्यैव स्यात् मानसत्वाविशेषात् । तथा "अयं संसारः अतीव विचित्रः" इति श्रीशङ्कराचार्यनिगमनं साधु भवति । व्यासाचार्येणोच्यते—

"मातापितृसहस्राणि पुत्रदारशतानि च ।
संसारेष्वनुभूतानि यान्ति यास्यन्ति चापरे" ।।

स्वार्थबुद्धया केवलम् आत्मनाशः न कार्यः, किन्तु तत्त्वदृष्टिम् अनात्मभूतेषु वैराग्यं च संजनयितुं सदुपदिश्यते आचार्यपादैः । तथा च आत्मा अनात्मभ्यो विविच्य ज्ञातव्यः । चित्तवृत्त्यभावे लौकिकस्य सुखस्य ग्रहणमेव नास्ति, किन्तु सुषुप्तौ सुखानुभूतिः अस्तीति विज्ञायते "सुखमहमस्वाप्सं न किञ्चिदवेदिषम्" इति प्रबोधे सुखानुस्मरणात् । अननुभूतस्य नैव स्मरणं संभवति, किन्तु अनुभूतस्यैव स्मरणं स्यात् । तथा च लौकिकवस्त्वपेक्षां विनैव सुखोपलब्धिरस्तीति, तत्सुखम् आत्मस्वरूपानुबद्धं भवतीति च विज्ञातुं शक्यते । यथा वा प्रपञ्चस्य उत्पत्तेः पूर्वं "स्वधया तदेकमेव" आसीत् । तथा सुषुप्तावपि कारण-

---

7. "आत्मैकत्वविद्याप्रतिपत्तये सर्वे वेदान्ता आरम्भन्ते ।" अध्यासभाष्यम्
8. "वेदान्तो नामोपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च"
(वेदान्तसारः, P.1.)

रूपाविद्यया साकम् एकं सद् आनन्दरूपम् आसीदिति विज्ञायते । सुषुप्तौ आत्मसाक्षात्कारः नास्ति । तत्त्वतः आत्मस्वरूपं ज्ञातं चेत्, सत्यं नैव निवर्तेत, निवर्त्यमानं वा ज्ञानेनैति । ततोऽपि अन्यदेव अखण्डमेकं सत्यमिति अभ्यूहितुं शक्यते । द्वैतं नैव सत्यं स्यात् ।

द्वैतज्ञानं तु दुःखकारणमेव स्यात् । अपि च सुषुप्तौ नैव द्वैतम् उपलभ्यते । किन्तु सौषुप्तिकानुभूतिरपि न नित्या अनित्यत्वात् ततोऽपि अन्यत् सदेकमेव सत्यं स्यादिति "सदेव सोम्येदम्" इत्यादि श्रुत्या युक्त्या स्वात्मानुभवेन च भगवत्पूज्यपादैः श्रीशङ्कराचार्यैः त्रिकालाबाध्यं सद् ब्रह्म आत्मैवेति सत्यं "तत्त्वमसि" इति महावाक्यमनुव्यवस्थाप्यते । तथा च अस्तीति सदा भासमानं सद् इति लक्षणसमन्वयोऽपि युक्तः स्यात् ।

वेदकालादारभ्य तत्त्वतः सन्निरूपणं दृश्यते । वेदेऽपि एकं सद् इत्यादि सन्निरूपणेनैव तत्वशास्त्रस्य आरंभः ।

पाश्चात्यानां तथा पौरस्त्यानां च यद्यपि सद्विषये किञ्चिन्निरूपणं दृश्यते तथापि तु तत्र समग्रतया वेदान्तशास्त्रमनुसृत्य निरूपणं न कृतमिति मया पुरातनेऽस्मिन् सद्विषये नूतनयत्नः क्रियते । वेदवेदान्तप्रतिबोधितं दर्शनं ब्राह्मात्मज्ञानमेकमेवाऽद्वितीयम् इति श्रीशङ्कराचार्याणां मतम् । तथाहि—

"एकं सद्विप्राः बहुधा वदन्ति" । (ऋ. वे; I, 164, 46)
"स्वधया तदेकम्" । (ऋ. वे., x, 129)
"सदेव सोम्येदमग्र आसीत्" । (छा., VI, 2, 1)
"ब्रह्म वा इदमेक एव अग्र आसीत्" । (बृ., I, iv, 10)
"आत्मा वा इदमेक एव अग्र आसीत्" । (ऐ., I, 1)

इत्यादि श्रुत्या नामरूपात्मकं निखिलमपि द्वैतजातं नाम्ना रूपेण च भिन्नमपि तत्त्वतः अभिन्नमेकमेव प्रपञ्चस्य कारणं सदिति विज्ञायते । ब्रह्मैव नित्यसत्तारूपेण आत्मस्वरूपमेव । "अयमात्मा ब्रह्म"[9] इति श्रुत्या आत्मैव ब्रह्मेति स्पष्टम् अभिधीयते । तथा च ब्रह्मैव आत्मा । आत्मैवेदं सर्वमिति श्रुत्या सर्वमपि आत्मरूपेण सद् इति विज्ञायते । तथा च स्वर्गभूमिदेवमनुष्यादिषु सर्वत्रापि आत्मव्यतिरेकेण न किमप्यस्ति । यद् दृश्यते व्यावहारिकं

---

9. मा. उ., 1, 2.

प्रातिभासिकं वा तन्न पारमार्थिकं सत्यम् । एकमेवाद्वितीयमिति श्रुत्या तु एकमेव सद् पारमार्थिकं सत्यं भवति । व्यावहारिकसत्यं तु पारमार्थिकसत्य-साक्षात्कारपर्यन्तम् अनुवर्त्तत एव ।

सन् घटः सन् पटः इत्यादिषु सर्वत्र अनुस्यूततया प्रत्यक्षेण सदेकमेव अनुभूयते । सर्वं सदधिष्ठितं कार्यत्वात् संप्रतिपन्नवदिति अनुमानेन च सदेकमेव विज्ञायते । तथा च प्रत्यक्षेण अनुमानेन तथा श्रुत्या च सदेकमेव सत्यमिति अद्वैते सन्निरूपितं सत्यज्ञानानन्दस्वरूपमिति युक्तियुक्तं भवति ।

अद्वैते तु पारमार्थिकी, व्यावहारिकी, प्रातिभासिकी चेति त्रिविधा सत्ता अङ्गीक्रियते । आत्मनि परं नित्यसत्ता त्रिकालाबाधिता पारमार्थिकी सत्ता विद्यते । जगति व्यवहारकाले अबाधितत्वात् व्यावहारिकी, प्रतीतिसमये अबाधितत्वात् रज्जुसर्पादौ प्रातीतिकी च सत्ता अङ्गीक्रियते । तथा च आत्म-सत्तावगतिपर्यन्तं निखिलस्य लोकव्यवहारस्य परिस्फूर्तये अद्वैते व्यावहारिकी सत्ताऽपि अङ्गीक्रियते इति बुद्धिमतामादरः स्यात् । अद्वैतवेदान्ते प्रपञ्चस्य मिथ्यात्वमेव अङ्गीक्रियते । तथात्वे लोकव्यवहारे जनानामनादरः स्यात्; तद्दोषायेति प्रवादोऽस्ति । तन्न समञ्जसम् । व्यावहारिकी सत्ता प्रपञ्चे पूर्णतया अङ्गीक्रियते इति लोकव्यवहारे परम आदरः एव पुरुषार्थसिद्धये भवतीति अद्वैतरहस्यं प्रामाणिकैः अङ्गीक्रियते । मिथ्यात्वं तु अर्थक्रिया-कारित्वमेव । सौषुप्तिकविज्ञानानुसारेण समाधिनिष्ठानाम् अनुभूत्या च प्रपञ्चस्य अधिष्ठानभूता पारमार्थिकी सत्ता भ्रमदुःखादिदोषरहिता सदा मङ्गलकारिणी भवति ।[10]

विशिष्टाद्वैते सूक्ष्मचिदचिद्विशिष्टं परं ब्रह्मैव सद् नारायणशब्देनाऽभि-धीयते । श्रीनारायणः अपहतपाप्मत्वादिश्रुत्या दोषरहितः । तथा निखिल-कल्याणगुणाकारः सर्वज्ञत्वसर्वशक्तित्वादिविशिष्टः स्थूलचिदचिद्विशिष्टस्य कार्यप्रपञ्चस्य उपादाननिमित्तसहकारिकारणत्वेन सर्वोत्कर्षेण वर्तते । आत्मानः जडाश्च चिदचिद्रूपाः श्रीनारायणस्य शरीरत्वेन सत्यभूताः । जीवजडयोः श्रीनारायणस्य अंशत्वशेषत्वशरीरभावेन स्थितिः । श्रीनारायणस्तु अंशी शेषी शरीरी चोच्यते । तथा च जीवजडयोः श्रीनारायणस्य च शरीरशरीरिभावः

---

10. दशश्लोकी., 9.

शेषशेषिभावः अंशांऽशिभावः वास्तीति सिद्धान्तः। तथैव शरीरविशिष्टत्वेन परं ब्रह्मैव सदेकमङ्गीक्रियते। विशिष्ट ब्रह्मैकं 'सद्' सत्यं स्यात्। द्वैतमते तु दोषरहितः सच्चिदानन्दशरीरः निखिलकल्याणगुणाकारः स्वतन्त्रो भगवान् विष्णुरेव ब्रह्मशब्देन अभिधीयते।

"वेदे रामायणे चैव पुराणे भारते तथा।
आदावन्ते च मध्ये च विष्णुः सर्वत्र गीयते॥"

तथा वेदादिवेद्यः सर्वज्ञत्वसर्वशक्तित्वादिविशिष्टः जगतः सृष्टिस्थितिसंहार-कारणभूतः परानपेक्षतया विष्णुरेक एव सद्रूपेण सर्वोत्कर्षेण वर्तते।

"यादृशं ब्रह्मणस्सत्त्वं तादृशं स्याज्जगत्यपि" इति वचनानुसारेण ब्रह्मणि यथा वा सत्यताप्रत्ययः तथैव जगत्यपि सत्यताप्रत्ययः। तथा च जीवानां जडानां च सत्यत्वमेव। किन्तु ईश्वराधीनसत्यतया असदिति व्यवस्थाप्यते॥

श्रीशङ्कररामानुजमाध्वसिद्धान्तेषु परं ब्रह्मैव सत्। अद्वैते ब्रह्मात्मस्वरूपं शुद्धं सत्. द्वैते विशिष्टाद्वैते च सकलकल्याणगुणाकारं विशिष्टं ब्रह्म सत्। द्वैते परं ब्रह्म सत्, तदधीनत्वात् जीवजडयोरपि सत्यत्वेऽपि असदिति तत्त्वम् इति विवेकः।

सदेव सत्यमिति प्रामाणिकम्। वेदान्ताभिमतं तत्सत्यं प्राचीनाचार्य-परम्परानुरोधेन अद्वैतविशिष्टाद्वैतद्वैतमतानुसारेण नैतावता पण्डितैः विमर्शकैः विशकलितम्। तथात्वे श्रीशङ्करश्रीरामानुजश्रीमध्वाचार्याणां वेदान्ततत्व-मवलम्ब्य सत्यदर्शननिरूपणं पण्डितानां गवेषकाणां विद्यार्थिनां संस्कृताभि-मानिनां च कृते सार्थकमिति परमार्थसत्यावबोधार्थं वेदान्तदर्शनं पूर्वाचार्य-स्मरणपूर्वकम् अनुविधीयते।

द्वितीयोऽध्यायः ।

अद्वैते सत्यदर्शनम् ।

अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः ।
असन्नेव स भवति असद्ब्रह्मेति वेद चेत् ॥

अस्तीति भासमानं सत् । तत्त्वतः त्रिकालाबाध्यं भासमानं सत् । सदेव सत्यम् । "सदिति अस्तितामात्रं वस्तु यदवगम्यते" । सतः भावः सत्ता—विद्यमानता ।

"सन्मात्रत्वं सत्वम्" सत्यं सद्भावः स्वरूपम् । तथा च अद्वैते त्रिकालाबाध्यं सन्मात्रत्वेन सत्यम् एकं भवति न द्वितीयं परमार्थतः ।

सत्तात्रैविध्यम्—सत्ता हि त्रिविधा—पारमार्थिकी, व्यावहारिकी प्रतिभासिकी च । परमार्थिकी सत्ता तु ब्रह्मण एव नान्यस्य कस्यचित् । व्यावहारिकी सत्ता भूतभौतिकस्य निखिलस्य प्रपञ्चस्य मोक्षदशायां बाध्यत्वेऽपि व्यवहारदशायामबाध्यमानत्वात् । प्रातिभासिकी सत्ता शुक्त्यादौ भासमानस्य रजतादेः संभवति । प्रतिभासकाल एव तत्सत्ता अनुभूयते ।

कालत्रये ज्ञातृकाले प्रतीतिसमये तथा ।
बाधाभावात्पदार्थानां सत्ता त्रैविध्यमिष्यते ॥

लौकिकं वैदिकं च निखिलं प्रमाणप्रमेयजातम् अस्तीति भसमानं ज्ञानकाले ब्रह्मज्ञानपर्यन्तम् अबाधितं तथा शुक्तिज्ञानपर्यन्तं रजतज्ञानम् अबाधितं भवति । घटपटादिकं कार्यजात निखिलमपि जगत् व्यावहारिकसत्तानुगतं पारमार्थिकसत्तावगतिपर्यन्तम् अनुवर्तत एव । पारमार्थिकसत्ता तु कालत्रयेऽपि अनुस्यूता भवति । सा त्रिकालाबाध्यत्वेन नित्या व्यावहारिकसत्तायाः अपि अधिष्ठानभूता विजयते । शुक्तिरजतादौ प्रतीतिसमये एव प्रातिभासिकी सत्ता अनुभूयते । तथा च कालत्रये ज्ञातृकाले प्रतीतिसमये च पदार्थानां बाधाभावात् पारमार्थिकी व्यावहारिकी प्रातिभासिकी चेति त्रेधा सत्ता अङ्गीक्रियते ।

ब्रह्म पारमार्थिकं, जगत् व्यावहारिकं, शुक्तिरूप्यादिकं प्रतिभासिकमिति सत्तात्रैविध्यमुपपद्यते। "ब्रह्मैव सत्" इति त्रिकालाबाध्यं पारमार्थिकं सत्त्वम् उच्यते। व्यावहारिकत्वप्रातिभासिकत्वे च सत्वे चावान्तरविशेषौ। स्वकालाबाध्यत्वस्य शुक्तिरूप्यादावपि सत्त्वात् अबाध्यत्वं आरोपितानारोपितसामान्यमिति सत्तात्रैविध्यमुपपन्नमेव। अत एव उक्तम्—

"आकाशादौ सत्यता काचिदेका
प्रत्यङ्मात्रे सत्यता काचिदन्या।
तत्संपर्कात् सत्यता तत्र चान्या
व्युत्पन्नोऽयं सत्यशब्दस्तु तत्र" ॥ इति।

लोके तावत् प्रातीतिकरजते ज्ञातं सदेकं रजतत्वम्, लौकिकपरमार्थरजते चाज्ञातं सद् अपरं रजतत्वम्, तदुभयानुगतं च आरोपितानारोपितसाधारणं रजतत्वं रजतशब्दालम्बनं दृश्यते। तथाहि आकाशादौ आरोपिता सत्यता एका। चिदात्मनि अनारोपिता अपरा सत्यता च। व्यावहारिकी सत्यता तु तदुभयसाधारणी च अन्या सत्यशब्दस्य आलम्बनं भवति।

"यद्रूपेण यन्निश्चितं तद्रूपं न व्यभिचरति तत्सत्यम्"। सद्भावः स्वरूपमेव सत्यम्। चिदात्मस्वरूपे ब्रह्मणि अनारोपिततया स्वतः भासमानं सद्रूपमेव आकाशादिषु सत्यस्वरूपेण अवभासमानं भवति सद्रूपस्य एकत्वात्।

"ब्रह्मणोऽपि तर्हि सत्तालक्षणः स्वभावः आकाशादिषु अनुवर्तमानो दृश्यते"।[1]

(1) तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति[2]। तस्य भासा सर्वमिदं विभाति।[3]

(2) ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म पश्चाद्ब्रह्म दक्षिणतश्चोत्तरेण। अधश्चोर्ध्वं च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम् ॥[4]

(3) ब्रह्म वेद ब्रह्मैव भवति[5]।

---

1. सू-भा., II, i, 6.
2. श्वे., IV, 14.
3. मु., II, ii, 11.
4. मु., II, ii. 12.
5. मु., III, ii, 1.

(4) तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्सर्वमभवत्[6]।

(5) तत्र को मोहः कः शोक एकत्वमनुपश्यतः ।[7] इति सत्यमेकमेव निर्धार्यते वेदान्तेषु ।

ब्रह्मसत्तानुगतं प्रपञ्चदर्शनम् —

नामरूपात्मकस्य जडस्य सूर्यचन्द्रादिद्वैतप्रपञ्चस्य तु न स्वतः प्रकाशन-सामर्थ्यमस्ति । निखिलमपि प्रकाशमानं परं ब्रह्म सद्रूपम् अनुभाति । तथा सद्रूपस्य ब्रह्मणः स्वयप्रकाशत्वं सिध्यति । प्रपञ्चस्य अधिष्ठानभूतकारणत्वेन आनन्दात्मकं च सत् ब्रह्म । तथाहि उक्तम्—

"अस्ति भाति प्रियं रूपं नाम चेत्यंशपञ्चकम् ।
आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् ॥" दृक्दृश्यविवेकः sl. 20

घटोऽस्ति, घटः प्रकाशते, घटः प्रियः इति सद्रूपेण प्रकाशरूपेण आनन्द-रूपेण च उपलभ्यमानं त्रयमपि ब्रह्मरूपमेव । घटे तु घटः इति नाम कम्बुग्रीवादिमत्त्वं रूपम् उभयमपि केवलं विद्यते । तथा च नामरूपत्वेन परिकल्पितस्य प्रपञ्चस्य सत्त्वादिकं ब्रह्माधीनम् । तथा च सत्यं ज्ञानमानन्दश्च प्रत्येकं ब्रह्मणः स्वरूपलक्षणम् । आनन्दो विषयानुभवः सत्यत्वं चेति सन्ति धर्माः, तथापि ते अपृथक्त्वेऽपि चैतन्यात् पृथगिव अवभासन्ते । सच्चिदानन्दब्रह्मैक्याध्यासादेव निखिलोऽपि लोकव्यवहारः ।

ब्रह्म सत्—

सद् एकमेव । तत्तु ब्रह्म । ब्रह्मैव सत्यम् । प्रत्यक्षेणाऽपि तादृशं सद्रूपमेव विज्ञायते । अत्राहुः तत्त्वशुद्धिकाराः—'न प्रत्यक्षं घटपटादि तत्सत्त्वं वा गृह्णाति, किन्तु अधिष्ठानत्वेन घटाद्यनुगत सन्मात्रम् । तथा च प्रत्यक्षमपि सद्रूपब्रह्माद्वैतसिद्ध्यनुकूलमेव' ।[8]

---

6. बृ., I, iv, 10.
7. ई., 7.
8. सि. ले. सं., P. 234.

तथा च इदं रजतम् इति ज्ञाने इदमंशस्य अधिष्ठानभूतस्य प्रत्यक्षे एव रजतग्रहणम्। इदमंशप्रत्यक्षे रजतज्ञानं, इदमंशाप्रत्यक्षे रजताग्रहणं च। निरधिष्ठानतया नैव ज्ञानोपलब्धिः। यथा वा शुक्त्याम् इदमंशभूतायां रजतज्ञानं भ्रान्त्यैव जायते, तथैव अधिष्ठानभूतसन्मात्रसत्त्वे एव घटपटादिद्वैतप्रपञ्चस्य अवभासः। यथा वा मृद्वस्तु घटशरावादिषु अनुस्यूततयोपलभ्यते तथैव लोके 'सन् घटः', 'सन् पटः' इत्यादिषु सर्वत्र सत्त्वम् अनुस्यूततया अवभासते। तथाहि उक्तम्—

"शुक्तीदन्तैव सन्मात्रं सर्वाध्यक्षेषु गोचरः।
रूप्यवद्घटभेदादिर्भ्रान्तिरित्यविरुद्धता" ॥[9]

इदं रूप्यमिति ज्ञाने रूप्यांशस्य भ्रान्त्या प्रतिभासः। तत्रेदमः एव प्रत्यक्षेण ग्रहणम्। तथा सर्वत्र सन्मात्रस्यैव प्रत्यक्षेण ग्रहणम्, तत्रैव इन्द्रियव्यापारः घटपटादिवस्तुप्रतिभासस्तु भ्रान्त्यैव जायते। तथा च इदमंशस्य अधिष्ठानस्य प्रत्यक्षेण रूप्यादिज्ञानं तथैव सन्मात्राधिष्ठानवस्तुप्रत्यक्षे घटादिद्वैतज्ञानम्, तदभावे न ज्ञानमिति सिद्धम्।

विमतं सदधिष्ठितं कार्यत्वात् संप्रतिपन्नवदिति सतः सर्वत्रोपलब्धिः। तदेव तत्त्वम् उपपाद्यते॥

"ब्रह्मसत्तानुविद्धं हि विश्वमिन्द्रियगोचरः।
स्वतो नेत्यविरुद्धत्वमाहुर्न्यायसुधाकृतः" ॥[10]

ब्रह्मसत्तायुक्तत्वादेव निखिलमपि जगद् इन्द्रियगोचरं भवति। तथा ब्रह्मणः सत्तानुगतत्वादेव प्रपञ्चस्यापि ग्रहणं संभवति, नेतरथा इति सिध्यति। समस्तस्यापि वस्तुजातस्य ब्रह्मप्रकृतिकत्वमेव। कारणगतसत्तायाः एव ग्रहणं घटपटादिषु उपलभ्यते इति कारणसत्तातिरेकेण कार्यस्य सत्ताभावात् "ब्रह्म सत्यं जगन्मिथ्या" इति वेदान्तपरमसिद्धान्त एव प्रतिपाद्यते एकस्य सनः अधिष्ठानभूतस्यैव सत्यत्वं श्रुतिभिरपि प्रतिपाद्यते। "यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्"।[11]

---

9. सि. ले. सं., P. 234.
10. Ibid.
11. छा., VI, i, 4.

"ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि" ।[12]

"नेह नानास्ति किञ्चन" ।[13]

"आत्मैवेदं सर्वम्" ।[14]

"यदेव साक्षादपरोक्षाद् ब्रह्म य आत्मा सर्वान्तरः" ।[15]

"ब्रह्मैवेदं विश्वम्" ।[16]

"मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति" ।[17]

"यत्र हि द्वैतमिव भवति तदितर इतरं पश्यति ।
तदितर इतरं जिघ्रति तदितर इतरं रसयते ।
तदितर इतरमभिवदति तदितर इतरं शृणोति ।
तदितर इतरं मनुते तदितर इतरं स्पृशति ।
तदितर इतरं विजानाति" ॥[18] इति ।

आविद्यकद्वैतविषय एव द्रष्टृदृश्यविभागः । सेयं आविद्यकी लौकिकी दृष्टिः अन्तःकरणवृत्तिरूपत्वाद् न पारमार्थिकी । वृत्तयश्च जायमानाः सद्रूपचैतन्यव्याप्ताः कारणात्मना ब्रह्मसत्तास्वरूपेणैव सत्यभूताः । तथा ब्रह्मैव सत्यम् ।

ब्रह्मणः स्वरूपं सत्यम्—

सत्यं ज्ञानमनन्तं ब्रह्म ।[19] सत्यादिवाक्ये त्रीणि लक्षणानि—सत्यं ब्रह्म, ज्ञानं ब्रह्म, अनन्तं ब्रह्म इति । सत्यादिवाक्यं वाच्यवृत्त्या तु सामानाधिकरण्येन एकार्थप्रतिपादकम् । तथाऽपि लक्षणत्रयप्रतिपादने अस्य वाक्यस्य तात्पर्यम् अवगम्यते । अन्यथा एकेनैव पदेन स्वरूपसिद्धौ इतरयोः वैयर्थ्यापत्तिः स्यात् । तथा सदेव ब्रह्म सत्यं, नान्यत् किञ्चित् सत्यं ज्ञानरूपम् अविनाशि वेति पदत्रयसार्थक्यं च भवति । ब्रह्मणो रूपाद्यभावेन ब्रह्म न प्रत्यक्षगोचरम् इति तत्स्वरूपविशेषज्ञानार्थम् अनेकलक्षणकथनं सार्थकं भवति ।

---

12. छा., VI, viii, 7.
13. बृ., IV, iv, 19.
14. छा., VII, xxv, 2.
15. बृ., III, v, 1.
16. मु., II ii. 12.
17. बृ., IV iv. 19.
18. बृ., IV. v. 15.
19. तै., II. i, 1.

सत्यं ज्ञानमनन्तं ब्रह्मेति ब्रह्मणो लक्षणार्थं वाक्यम्। ब्रह्मविदाप्नोति परमिति अत्रोपक्रमः। यस्माद् अन्यस्मात् परं किञ्चिदपि नास्ति तादृशं सर्वस्मात् परं ब्रह्म सामान्यतो ज्ञातं तथा च सत्यादिवाक्यवैयर्थ्यापत्तिः न वक्तुं शक्यते, असाधारणस्वरूपावबोधनेन साफल्यात्।

"बृहृ बृहि वृद्धौ" इति धातोः ब्रह्मेति शब्दो निष्पन्नो वृद्धौ महत्त्वे वर्तते। तच्च महत्त्वं देशतः कालतः वस्तुतश्चानवच्छिन्नत्वं संकोचकमानान्तराभावाद् निरतिशयमहत्त्वसम्पन्ने धर्मिणि पर्यवस्यति। ततो वन्ध्यासुनादिशब्दविलक्षणो ब्रह्मशब्दः।[20]

रज्जुसर्पादेः सदधिष्ठानत्वदर्शनात् प्रपञ्चस्यापि दृश्यत्वादिहेतुभिः मिथ्यात्वेन ज्ञातस्य सदधिष्ठानत्वं संभाव्यते। प्रपञ्चस्य अधिष्ठानतया संभावितस्य देशकालाद्यनवच्छिन्नस्य सतः ब्रह्मणः स्वरूपविशेषनिर्धारणार्थं सत्यादिलक्षणस्य उपपत्तिः दृश्यते। लक्ष्यस्वरूपस्यापि सतः सत्यादेः ज्ञातस्य इतरव्यावृत्तिबोधोपयुक्ततया लक्षणत्वम्। अव्याकृतादि ब्रह्मशब्दवाच्यतया सजातीयं, जडस्वरूपद्वैतप्रपञ्चः विजातीयः। तस्मात् सजातीयविजातीयव्यावर्तकतया सत्यादिलक्षणस्य लक्षणत्वप्रसिद्धिः संभवति।

सत्यं ब्रह्म—

अत एकैको विशेषणशब्दः परस्परं निरपेक्षो ब्रह्मशब्देन संबध्यते—सत्यं ब्रह्म, ज्ञानं ब्रह्म, अनन्तं ब्रह्मेति। सत्यमिति, यद्रूपेण यन्निश्चितं तत् तद्रूपं व्यभिचरति तदनृतमित्युच्यते। अतो विकारोऽनृतं, वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्, एवं सदेव सत्यमित्यवधारणात्। अतः "सत्यं ब्रह्म" इति ब्रह्म विकारान्निवर्तयति।[21]

अत्र ब्रह्मविदाप्नोति परमिति वाक्ये ब्रह्मवित्पदेन उक्तं ब्रह्मवेदनं तु निर्विकल्पकसाक्षात्काररूपं गृह्यते। तादृशे साक्षात्कारे ज्ञातुः ज्ञातृत्वं वा, ज्ञेयस्य ज्ञेयत्वं वा नैव भासते। शुद्धं सदेकमेव विद्यते। तादृशं निर्विकल्पकसाक्षात्काररूपं ब्रह्मवेदनमेव सत्यं ज्ञानमनन्तं ब्रह्म यो वेद इत्यनेन प्रतिपादितम्। यदि सविकल्पकं ब्रह्मज्ञानमुच्येत तर्हि उपक्रमविरोधः स्यात्। निर्विकल्पकं ज्ञानं

20. तै. आन., P. 51 21. (तै., भा, II. i, 1.)

तु सविकल्पकज्ञानविषयं न भवतीति निर्विशेषं ब्रह्मैव सत्यं ज्ञानमित्यादि-श्रुत्या प्रतिपाद्यते। ब्रह्मणः सर्वाधिष्ठानतया तद्रूपसत्तायाः सर्वानुस्यूतत्वेन सत्यत्वमेव। सत्यत्वं तु त्रिकालाबाध्यत्वम्। ब्रह्मणि अनारोपिता सत्ता त्रिकालाबाधिता वर्तते। "प्रत्यङ्मात्रे सत्यता काचिदन्या"[22] इति उक्ता अनारोपिता सत्यतैव ब्रह्मणि अव्यभिचारितया सत्यस्यापि सत्यत्वेन, अनृतं प्रति अधिष्ठानत्वेऽपि अनृताश्रितत्वाभावेन सद्रूपेण वर्तते। सदेव सत्यम्। सत्यं ब्रह्मेत्युक्ते विकारात् जडात्मकात् व्यावृत्तिः परिच्छेदव्यावृत्तिश्च।

"तच्च सत्त्वं त्रिकालाबाध्यत्वमेव। न तस्य श्रौतत्वहानिः, तस्यानृतं प्रति अधिष्ठानत्वेऽपि अनृताश्रितत्वाभावेन तद्व्यावर्तकत्वसंभवात्"।[23]

घटशरावादिकं वाचा केवलं आरभ्यते इति विकारजातम् अनृतं भवति। नामधेयमात्रमेतत् नतु तत्त्वतोऽस्ति। यथा पुरुषस्य चैतन्यमिति, राहोः शिर इति विकल्पमात्रम्।[24]

वाचारम्भणं विकारो नामधेयम्—वाचैव केवलं अस्तीत्यारभ्यते विकारो घटः शरावः उदञ्चनं चेति। न तु वस्तुवृत्तेन विकारो नाम कश्चिदस्ति। नामधेयमात्रं हि एतदनृतम्। मृत्तिकेत्येव सत्यमित्येष ब्रह्मणो दृष्टान्त आम्नातः॥[25] तथा घटशरावादिविकारजातस्य वागालम्बनमात्रत्वाद् विकारो नाम वस्तु मृत्तिकाव्यतिरेकेण नास्ति। तथा मृत्तिकेत्येव सत्यं इत्युक्तम्। घटशरावोदञ्चनादीनां तत्त्वं मृदेव। घटादिविकारेषु सर्वत्र मृदेव अस्ति। मृद्रूपेण निश्चित रूपं न घटादिषु व्यभिचरतीति मृत्तिकैव सत्यम्। तथा अनृतात् विकारजाताद् व्यावृत्तं ब्रह्म सत्यम्॥

---

22. संक्षेपशारीरकम्., I, 178.

23. अ. सि., P. 692

24. शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः इति विकल्पविदः।

25. ब्र. सू. भा., II, 1, 14.
सत्ता यस्यास्ति तत्सत्यमिति लोकरूढिः।
"ऐतदात्म्यमिदं सर्वं तत्सत्यम्" छा., VI, viii, 7.

ज्ञानं ब्रह्म—

मृत्तिकायाः सत्यत्वेऽपि अचेतनत्वं दृश्यते । तद्व्यावृत्त्यर्थं ब्रह्मणः स्वरूपं ज्ञानमित्युच्यते । अपिच मृन्निष्ठकारणत्वमपि विप्रतिषिध्यते ।

(1) "ज्ञानं ज्ञप्तिः अवबोधः—भावसाधनो ज्ञानशब्दः ब्रह्मविशेषणत्वात् सत्यतानन्तताभ्यां सह सार्थको भवति । न सत्यता अनन्तता च ज्ञानकर्तृत्वे सति उपपद्यते ।"

भावव्युत्पत्तिकः अवबोधः तु निर्विशेषं चिन्मात्रं लक्षयति सत्यादिपद-सन्निधानात् । ज्ञानकर्तृत्वं हि ज्ञानं तदनुकूला क्रिया च । ज्ञानादिरूपेण विक्रियमाणस्य ब्रह्मणः सत्यत्वं न स्यात् । अतः सत्यादिस्वरूपसिद्धयै ज्ञातृज्ञेयादि द्वैते विप्रतिषिद्धम् ।

(2) "ज्ञानं ब्रह्म" इति कर्त्रादिकारकनिवृत्त्यर्थं मृदाद्यचिद्रूपतानिवृत्त्यर्थं च प्रयुज्यते" ।

(3) "यत्र नान्यद्विजानाति स भूमा" ।

(4) "यत्साक्षादपरोक्षाद् ब्रह्म" ।

तथा च स्वप्राकाशचैतन्यस्वरूपं ज्ञातृज्ञेयादिभिन्नं जडभिन्नं च सन्मात्रत्वेन साक्षादपरोक्षं भवति इति सिद्धम् ॥

अनन्तं ब्रह्म—

ब्रह्मणो ज्ञप्तिक्रियारूपत्वे तु आनन्त्यायोगात् चैतन्यमात्रं लक्षणीयम् । तथापि लौकिकस्य ज्ञानस्य अन्तवत्त्वात् "अनन्तं ब्रह्म" इति स्वरूपमुच्यते ।

अत्र अनन्तशब्दः अन्तवत्त्वप्रतिषेधद्वारेण विशेषणम् । तथा च अनन्तशब्देन परिच्छेदाभावबोधनद्वारा परिच्छिन्नाद् व्यावर्तकेन नित्यशुद्धमुक्तस्वरूपं सदेव त्रिकालाबाध्यं ब्रह्म लक्ष्यते ॥ तथाहि सर्वविकल्पास्पदं सर्वप्रवृत्तिबीज निर्विशेषं सद्रूपं अखण्डज्योतिस्वरूपेण भासमानं निरतिशयपरमानन्दपरमार्थ-सदापन्नं ब्रह्मात्मस्वरूपं ब्रह्मविदः तत्त्वतः विजानन्ति । जीवात्मनां ज्ञात्वा अज्ञात्वा वा स्वस्वरूपोपलब्धये परमेश्वरप्रसादात् प्रवृत्तिः स्यात् ।

आत्मस्वरूपम् सत्यम् —

सद्रूप: आत्मा। आत्मनः सत्त्वं त्रिकालावच्छेदेन न व्यभिचरति।[26] जन्मादिषड्भावविकारशून्य आत्मा प्रतिव्यक्ति न भिद्यते।

तथाहि उक्तम्—

न जायते म्रियते वा कदाचि-
न्नाय भूत्वाऽभविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो
न हन्यते हन्यमाने शरीरे॥[27]

अस्मिन् मन्त्रे षड्भावविकाराः लौकिकवस्तुविक्रिया आत्मनि प्रतिषिध्यन्ते। सर्वप्रकारविक्रियारहित आत्मा इति वाक्यार्थः।[28] परमार्थतः ब्रह्मैव आत्मा। सत्योऽयमात्मा[29]। सत्यत्वं नाम बाधराहित्यम्। 'सत्यमबाध्यं बाध्यं मिथ्ये'ति तद्विवेक' इति पूर्वाचार्याः। अनात्मभ्यो विवेकेन आत्मप्रतिपत्तिस्तु वेदन्तिवाक्यादिभिः एव ज्ञायते।

"आत्मा वा इदमेक एवाग्र आसीत्"[30]

अखण्डम् आत्मतत्त्वमेकमेव प्रपञ्चस्य उत्पत्तेः पूर्वम् आसीत्। प्रत्यगात्मस्वरूपमेव तत् यत्सत्त्वेन निखिलमपि कार्यजातं प्रतीयते।

"स च एषोऽणिमैतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि"[31] इति सर्वस्यापि प्रपञ्चस्य श्रोतुः श्वेतकेतोः ब्रह्मात्मकत्वं सत्त्वमभिधीयते

---

26. "यदेव साक्षादपरोक्षाद् ब्रह्म य आत्मा सर्वान्तरः"। बृ., III, v, 1.

27. गीता., II, 20; काठ., II, 18.

28. भाष्यम्–गीता., II, 20.

29. "यच्चाप्नोति यदादत्ते यच्चात्ति विषयानिह।
यच्चास्य सन्ततो भावस्तस्मादात्मेति गीयते"॥

30. ऐ., I. 1; "इदं सर्वं यदयमात्मा"। बृ, II, iv, 6.

31. छा., VI. viii, 7; "अहं ब्रह्मास्मि"। बृ., I, iv, 10; "प्रज्ञानं ब्रह्म"। ऐ., V, 3.

एकम्[32]। तथा च सच्छब्दवाच्यादद्वितीयब्रह्मणः तेजोऽबन्नादिसृष्टिमुपदिश्य तस्याः एव सदाख्यायाः परस्याः देवतायाः जीवात्मरूपेण अनुप्रवेशः नामरूप-व्याकरणं चोच्यते[33]। ततस्तु मृल्लोहविस्फुलिङ्गादिदृष्टान्तैः कार्यकारणयोः भेदव्युदासपूर्वकं कार्यस्य कारणानन्यत्वात्[34] कारणविज्ञानेनैव सर्वं कार्यं विज्ञातं भवतीति प्रतिज्ञाय 'तत्त्वमसि' इति वाक्योपदेशः।

"ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि"[35] इति। आत्मतत्त्वस्य तत्त्वमस्यादिवाक्यमेव प्रमापकं भवति। "अयमात्मा ब्रह्म"[36] इति श्रुत्या एकार्थबोधकत्वं च दृश्यते। तैत्तिरीयोपनिषदि च ब्रह्मण आकाशादि जगत्सृष्टि-मुक्त्वा ततः ब्रह्मैकत्वं स्पष्टम् अभिधीयते।

"यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्येऽनिरुक्तेऽनिलयनेऽभयं प्रतिष्ठां विन्दते। अथ सोऽभयं गतो भवति"।[37] एतस्मिन् अविकारभूते अशरीरेऽनाधारेऽविषये ब्रह्मणि आत्मभावं लभते। तदा अविद्याकृतस्य द्वैतजातस्य अदर्शनात् अभयं गतो भवति। आत्मनः एव आत्मनो नैव भयम्। अन्यस्य ह्यन्यतो भयं भवति। आत्मसाक्षात्कारेण अभयं भवति। द्वितीयस्माद्वै भयं भवति। नहि तदा द्वैतमुपलभ्यते। यदा नान्यत्पश्यत्यात्मनि चान्तरं भेदं न कुरुते। तदाऽभयं गतो भवतीत्यभिप्रायः। "अभयं हि वै ब्रह्म भवति"।[38] स्वरूपे प्रतिष्ठैव ब्रह्मात्मानुभवः इत्युच्यते। आत्मचैतन्यस्वरूपानतिरिक्त एव सन् वस्तुतः स्वप्रकाश्यदृश्यापेक्षया अनुभव इत्युच्यते। यथा सूर्यः प्रकाशस्वरूप एव सन्

---

32. "अयमात्मा ब्रह्म" बृ., II, V, 19; मा., उ, 2.
33. "सन्मूला सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः" छा., VI, viii, 4.
34. "यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृन्मयं विज्ञातं स्याद्वाचारम्भणम् विकारो नामधेयं मृत्तिकेत्येव सत्यम्" छा., VI, i, 4.
35. छा., vi, viii, 7.
36. बृ., II, v, 19.
37. तै., II, 7.
38. बृ., IV, iv, 25.

प्रकाश्यापेक्षया प्रकाशक इत्युच्यते तद्वत् । प्रत्यक्षादिप्रमाणैः नायमात्मा प्रत्याययितुं शक्यते[39] । आत्मा हि न कस्यचित् प्रमाणस्य विषयः परमार्थतोऽद्वयत्वात्, नित्यापरोक्षस्वभावत्वाच्च स्वयं प्रसिद्धो नान्यत्किञ्चनाऽपेक्षते स्वसाधनाय । "न ह्यात्मा आगन्तुकः कस्यचित् स्वयं सिद्धत्वात् । नह्यात्मा आत्मनः प्रमाणमपेक्ष्य सिद्धयति" ।[40]

तस्य हि प्रत्यक्षादीनि प्रमाणानि अप्रसिद्धप्रमेयसिद्धये उपादीयन्ते ।[41] 'स एष नेति नेत्यात्मा' ।[42] 'यत् साक्षादपरोक्षाद् ब्रह्म य आत्मा सर्वान्तरः" । 'एष त आत्मा सर्वान्तरोऽतोऽन्यदार्तम्'[43] आत्मा जडस्य प्रपञ्चस्य अधिष्ठानभूतः सत्यं, तद्भिन्नं अनात्मा तु असत्यम् । तथाहि निखिलस्य अनात्मनः अध्यारोपमात्रत्वात्, स एष नेति नेत्यात्मा इति निह्नुते, निर्विशेषात्मस्वरूपं तु सर्वनिह्नवात् परं स्वयमेव आत्मा प्रकाशते । देहात्मत्वभ्रान्त्यवस्थायामपि सर्वस्यापि अन्तरतमः आत्मा सर्वातिशयस्वरूपेण वर्तते । वेदान्ताः तत्स्वरूपसमर्पणे प्रमाणम् । सर्वशरीरेष्वेक एवात्मा नान्यः इति किल सत्यदर्शनम् । "अन्त्यमिदं प्रमाणमात्मैकत्वस्य प्रतिपादकम् । ततः परं न किञ्चिदाकाङ्क्ष्यमस्ति" ।[44] "प्रमातृत्वं ह्यात्मनो निवर्तयत्यन्त्यं प्रमाणम् । निवर्तयदेव चाप्रमाणीभवति स्वप्नकालप्रमाणमिव प्रबोधे"[45] तस्मात् "अहं ब्रह्मास्मि' इत्येतदवसाना एव सर्वे विधयः, सर्वाणि चेतराणि प्रमाणानि च ।

देहात्मप्रत्ययो यद्वत् प्रमाणत्वेन कल्पितः ।
लौकिकं तद्वदेवेदं प्रमाणं त्वात्मनिश्चयात् ।। इति निर्धारितम् । तथाहि आत्मा एक एव परमार्थतः सन्निति तत्त्वं वेदान्तादेव विज्ञायते । लौकिकं वैदिकं च प्रमाणजातं आत्मज्ञानपर्यन्तमेव प्रामाणिकं भवति । सर्वोऽपि

---

39. नायमात्मा प्रवचनेन लभ्यो न मेधया बहुना श्रुतेन । क., II, 23.
40. "रूपाद्यभावाद्धि नायमर्थः प्रत्यक्षस्य गोचरः, लिङ्गाद्यभावाच्च नानुमानादीनाम्" । सु. भा., II, iii, 7.
41. सू, भा., II, iii, 7.
42. बृ., IV, iv, 22.
43. बृ., III, iv, 2
44. see सू. भा., II, i, 14.
45. बृ. भा., I, iv, 10.

लौकिको वैदिकश्च व्यवहारः अविद्याविषय एव। अविद्याबन्धो मिथ्याभूतः। यथा रज्जुतत्त्वज्ञानेन मिथ्याभूतस्य सर्पाद्यात्मकस्य विलयः तथैव सद्रूपस्य आत्मनः सर्वात्मकस्य विज्ञानेन मिथ्याभूतं द्वैतं विलयं यास्यति। तथा च सद्रूपः आत्मा एव सत्यः। आत्मैव सत्यं आत्मसत्यं मृत्तिकावत्। तथा चोक्तम्—

आत्मसत्यानुबोधेन न संकल्पयते यदा।
अमनस्तां तदा याति ग्राह्याभावे तदग्रहम्॥ (मा., III, 32.)

सर्वमात्मैवेति तत्त्वज्ञाने तु मनसो मनस्त्वं न वर्त्तते। मनसः व्यावहारिकं रूपं तु संकल्पः। संकल्पस्तु संकल्प्यपेक्षत्वात् तदभावे न भवति। ज्ञानस्वरूप आत्मा स्वयंज्योतिः प्रकाशान्तरमनपेक्ष्य स्वयंप्रकाशो भवति। जडस्वरूपाणां मनोबुद्ध्यादीनां आत्मप्रकाशेनैव ग्रहणम्। तथा च चैतन्यस्वरूपेण सद्रूपः—'योऽयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः"[46] "न दृष्टेः द्रष्टारं पश्येः"[47] "येनेदं सर्वं विजानाति तं केन विजानीयात् विज्ञातारमरे केन विजानीयात्"॥[48]

तथा च सर्वप्रपञ्चाधिष्ठानभूतं सूक्ष्मं चैतन्यस्वरूपं परं तदेव स्थूलप्रपञ्चरूपेणाऽवभासमानं च अपरं तत्त्वम्। तादृशे आत्मनि साक्षादहमस्मीति साक्षात्कृते बुद्ध्याश्रयः अविद्यावासनाप्रचयः हृदयग्रन्थिः विनश्यति।[49] तथा च विज्ञानस्वरूपः आत्मा[50] सत्यज्ञानानन्तस्वरूपमिति इन्द्रियार्थमनोबुद्ध्याद्यनात्मभिन्नेन 'तत्त्वमसि' महावाक्यप्रतिबोधिताद्वैतसाक्षात्कारेण सद्रूपत्वेन नित्यः सर्वगतश्च[51] तदा सर्वज्ञेयविषयसंशयाः गङ्गाप्रवाहवदामरणान्तं प्रवृत्ताः विनश्यन्ति। अद्वैतं तत्त्वं साक्षात्करोति च।[52] तथा चोक्तम्—

---

46. बृ., IV, iii, 7.
47. Ibid III, iv, 2.
48. Ibid II, iv, 14.
49. "भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परापरे"॥ मु., II, ii, 9.
50 "इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः"॥ क., III, 10.
51. अशरीरं शरीरेष्वनवस्थेष्ववस्थितम्।
महान्तं विभुमात्मानं मत्वा धीरो न शोचति॥ क., II, 22.
52. मा. भा., I, 16.

अनादिमायया सुप्तो यदा जीवः प्रबुध्यते ।
अजमनिद्रमस्वप्नमद्वैतं बुध्यते तदा ॥[53] इति ।

"योऽयं संसारी जीवः उभयलक्षणेन तत्त्वाप्रतिबोधरूपेण बीजात्मना अन्यथाग्रहणलक्षणेन चानादिकालप्रवृत्तेन मायालक्षणेन स्वप्नेन, ममायं पिताऽयं नप्ता क्षेत्रं पशवोऽहमेषां स्वामी सुखी दुःखी क्षीयतेऽहमनेन वर्धितश्च...... स्थानद्वयेऽपि पश्यन् सुप्तो, यदा वेदान्तार्थतत्त्वाभिज्ञेन परमकारुणिकेन गुरुणा "नास्येवं त्वं हेतुफलात्मकः किन्तु तत्त्वमसि' इति प्रतिबोध्यमानो यदा तदैव बुध्यते" । तथा तत्त्वाग्रहणम् अन्यथाग्रहणं च केवलं मायाकल्पितम् । कल्पितं सर्वं विनिवर्तेत, षड्भावविकारशून्यमात्मस्वरूपं सर्वदा सद्रूपेण वर्तते । तथा च आत्मैव ब्रह्म सत्यं, त्रिकालाबाध्यं, नित्यशुद्धमुक्तस्वरूपम्, अजमेकमेवाद्वितीयम्इति ॥

सत् असत्

सदेव सत्यम् । सत्यमबाध्यम्, बाध्यं मिथ्या इति विवेकः । मिथ्याऽपि सदिति प्रतीयेत । "सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयम्" ।[54] "सदेव सदित्यस्तितामात्रं वस्तु सूक्ष्मं निर्विशेषं सर्वगतमेकं निरञ्जनं निरवयवं विज्ञानं यदवगम्यते सर्ववेदान्तेभ्यः" ।[55] तदेव ब्रह्म सत्यम् । यद्विज्ञानेन सर्वविज्ञानोपलब्धिः तद्विज्ञानमेव सच्छब्देन अत्र लक्ष्यते । मृत्पिण्डेन विज्ञातेन निखिलमपि मृन्मयं विज्ञातं भवति । तथा कार्यभूतस्य प्रपञ्चस्यापि कारणविज्ञानेन विज्ञानं भवेत् । विश्वस्य उत्पत्तेः पूर्वं कारणं तु सदेव आसीत् । तथा सद्व्यतिरेकेण तदा विश्वं नैव आसीत् इति 'सदेवे'त्यादि-श्रुत्या विज्ञाप्यते ।

अस्तितामात्रं वस्तु सत् । सत् सूक्ष्मं भवति । सूक्ष्मत्वात् पृथिव्यादि-स्थूलवस्तुभ्यो भिन्नम् । निर्विशेषत्वात् आकाशादिभ्यो व्यावृत्तं च भवति । सर्वगतत्वात् नित्यं च तत् । स्वकार्यपतितम् अन्यत् नास्तीत्येकम् । तथा च अनुभूयमानस्य नामरूपात्मकस्य भोग्यभोक्त्रादिप्रपञ्चजातस्य कारणं उत्पत्तेः पूर्वं सदेव आसीत् । इदंशब्दश्च अत्र उद्देश्यसमर्पकः । सच्छब्दो विधेयसमर्पकः

53. मा., I, 16. 54. छा., VI, ii, 1.
55. छा. भा., VI, ii, 1.

एवकारप्रयोगात्[55]। इदानीमपीदं सदेव किन्तु नामरूपविशेषणवदिदंशब्द-बुद्धिविषयं चेतीदं च भवति । "यथा सुषुप्तादुत्थितः सत्त्वमात्रमवगच्छति सुषुप्ते सन्मात्रमेव केवलं वस्त्विति तथा प्रागुत्पत्तेरित्यभिप्रायः" ॥[56]

सुषुप्तिकाले सदपि वस्तु इदंशब्दबुद्धिगोचरं न भवति । सुषुप्तौ नामरूपात्मकं द्वैतं न उपलभ्यते सुषुप्त्यभावप्रसङ्गात् । तथा च प्राज्ञावस्थायां यथा वा केवलं सन्मात्रं गृह्यते तथैव प्रपञ्चस्य उत्पत्तेः पूर्वं सदेकमेव आसीत् ।

एकमेवाऽद्वितीयं इति च पदद्वयं विधेयपरम् । तत्रापि इदंशब्दवाच्यम् उद्देश्यं तु इदमेव । अग्र इति विधेयत्रये सति च अपि संबध्यते ।

(1) इदं जगदुत्पत्तेः प्राक् सद्रूपमेव आसीत् ।

(2) इदं जगदुत्पत्तेः प्राक् एकमेव आसीत् ।

(3) इदं जगदुत्पत्तेः प्राक् अद्वितीयमेव आसीत् ।

अत्र प्रथमवाक्ये शून्यवादनिरसनद्वारा सत्कारणवादः व्यवस्थापितः । इदं सदिति सामानाधिकरण्येन निर्देशात् सतः उपादानकारणत्वं च प्रस्थापितम् । द्वितीये वाक्ये तु अनेककारणनिरसनद्वारा एककारणवादः प्रस्थापितः । तृतीयेन अद्वितीयमित्यनेन सविशेषकारणवादनिरसनद्वारा निर्विशेषकारण-वादः प्रस्थापितः । एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा तु निर्विशेषसन्मात्रकारणत्वे एव संभवति । तथा चोक्तम्—

सजातीयं न मे किञ्चिद्विजातीयं न मे क्वचित् ।
स्वगतं च न मे किञ्चिन्न मे भेदत्रयं भवेत् ॥[57]

सजातीयविजातीयस्वगतभेदशून्यं सदेव प्रपञ्चस्य उत्पत्तेः पूर्वमासीत्[58] ॥

यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः संभवन्ति ।
तथा सतः पुरुषात्केशलोमानि तथोऽक्षरात्संभवतीह विश्वम् ।[59] किन्तु

---

55. "तच्छब्द एवकारश्च स्यादुपादेयलक्षणम्" ।

56. छा. भा., VI, ii. 1. 57. तेजो., 3–47

58. जडभेदो विजातीयभेदः, चैतन्यभेदः सजातीयभेदः, ज्ञानानन्दादिधर्मभेदः स्वगतभेदः । अ. सि., P. 525.

59. मु., I, i, 7.

मनोजृम्भणराहित्ये यथा साक्षी निराकुलः
मायाजृम्भणतः पूर्वं सत्तथैव निराकुलम् ॥[60] इति

कर्तृत्वभोक्तृत्वादिरहिते निष्प्रपञ्चे मनसि प्रत्यगात्मा निर्गतसर्वविक्षेप-निमित्तः स्फुरति। तथैव मायायाः सृष्ट्यात्मकव्यापारात्पूर्वं सत् एकमेव सत्यं स्वतः प्रकाशते। "आनीदवातं स्वधया तदेकम्"।[61] कार्यकारणयोस्त्रिषु कालेषु सदेकमेव उपलभ्यते। तथा चोक्तं विद्यारण्यमुनिना—

"सद्वस्तु शुद्धन्त्वस्माभिर्निश्चितैरनुभूयते।
तूष्णीं स्थितौ न शून्यत्वं शून्यबुद्धश्च वर्जनात्" ।[62] इति

सत्यज्ञानानन्तस्वरूपं शुद्धं सत् निर्विकल्पसमाधिनिष्ठैः साक्षादेव अनुभूयते। मनसः सर्ववृत्तिनिरोधे एवात्मोपलब्धिः। शून्यमिति प्रतीतेरभावात् शून्यत्वं नैव परिकल्पयितुं शक्यते। यदि तदानीं प्रतीतस्य शून्यत्वं स्यात् शून्यमिति प्रतीयेत। तादृशप्रतीत्यभावात् तत्त्वज्ञानिभिः निर्विकल्पसमाधौ अनुभूयमानं तत्त्वं सदेव।

"सदसतोः यथासंख्यं विधायकप्रमाणविषयता सतो भावः तत्प्रतिषेधश्च असतो भावः। सदिति विधायकप्रमाणविषयतां परामृशति"। तथा च साक्षादपरोक्षं तत्त्वं सदेव। तथा चोक्तं भगवता—

नासतो विद्यते भावो नाभावो विद्यते सतः।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥[63] इति

"यद्विषया बुद्धिः न व्यभिचरति तत् 'सत्'—यद्विषया बुद्धिः व्यभिचरति तत् 'असत्' इति सदसद्विभागे बुद्धितन्त्रे स्थिते सर्वत्र द्वे बुद्धी सर्वैरुपलभ्येते सामानाधिकरण्ये"[64] "यथाहि घटः सर्वदा सर्वत्र घट एव, न जात्वसौ क्वचित्पटो भवति एवं सदपि सर्वत्र सर्वदा सदेव न तु क्वचित् कदाचित् असत् भवितुमर्हति......तस्मात् कार्यं त्रिषु अपि कालेषु सदेव"।[65] पटादिकार्यसंस्थानं चक्षुषा निरूप्यमाणं तन्त्वादिकारणातिरेकेण अनुपलब्धेः सर्वोऽपि कार्यजातः

---

60. पञ्च., II, 46. 61. ऋ. वे., X, xi, 129.
62. पञ्च., II, 44. 63. गीता., II, 16.
64. गीता., भा., 2. 16. 65. भामती., P. 434.

कारणव्यतिरेकेण अनुपलब्धेः असन्नेव भवति। तथा च पटादिबुद्धिः व्यभिचरतीति असत्। किन्तु सन् पटः सन् घटः इत्यादिषु सर्वत्र सत्त्वानुसारात् सत्त्वविषये बुद्धिर्न व्यभिचरति। देहादेर्द्वैतस्य च सकारणस्यासतो न विद्यते भाव इति। तथा सतश्चात्मनोऽभावो अविद्यमानता न विद्यते—सर्वत्र अव्यभिचारात्। तथा च सत्त्व तु प्रतिव्यक्ति न भिद्यते। स्वतः सद्रूपात् कारणात् अनन्यत्वमेव प्रपञ्चस्य। प्रपञ्चस्य तु नामरूपात्मकतया यद्यपि विपरिणामः, देशकालावच्छेदेन दृश्यते; तथापि तु विपरिणामरहिततया देशकालानवच्छेदेन सदेकमेव सर्वत्र वर्तते। तथा विश्वमिदं कारणरूपेण सत्; कार्यरूपेण असत्। नहि सदसतोः सबन्धः तमःप्रकाशवत्। नापि सतो वा असतो वा जन्म तत्त्वतः संभवति। तथाहि उक्तम् –

सतो हि मायया जन्म युज्यते न तु तत्त्वतः।
तत्त्वतो जायते यस्य जातं तस्य हि जायते॥[66] इति

सदेकमेव अद्वितीयम्। द्वैतं मायाकल्पितं असत्। मायादिना प्रयुक्ता माया तत्त्वतः असत्येव। तथा मायया परिकल्पितं नामरूपात्मकं जगदपि असदेव।[67]

सतः विद्यमानादेव मायानिर्मितस्य हस्त्यादिकार्यस्य इव प्रपञ्चस्य जन्म युज्यते, न तु असतः। तथा रज्ज्वादेः सर्पादिवत् सतः मायया न तु तत्त्वतः। अतः मायिकं जन्मापि न तात्त्विकम्। रज्जुतत्त्वे न तु सर्पादिरुत्पद्यते। घटकरकाद्याकाशानां महाकाशानन्यत्वं यथा, यथा च मृगतृष्णिकोदकादीनामूषरादिभ्योऽनन्यत्वं यथा वा सर्पोदकधारादीनां रज्जुतत्त्वानन्यत्वं दृष्टनष्टस्वरूपत्वात् स्वरूपेण अनुपाख्यत्वात्, अस्य जगतः सतोऽनन्यत्वात् न तत्त्वतः उत्पत्तिः। मायिकं तत्त्विकं वा जन्म असतः सकाशादपि न संभवति। तथा हि उक्तमाचार्येण—

"असतो मायया जन्म तत्त्वतो नैव युज्यते।
वन्ध्यापुत्रो न तत्त्वेन मायया वाऽपि जायते" ॥[68] इति

---

66. मा., III, 27.
67. आदावन्ते च यन्नास्ति वर्तमानेऽपि तत्तथा।
वितथैः सदृशाः सन्तोऽवितथा इव लक्षिताः॥ मा., II, 6.
68. मा., III, 28.

नासत्पूर्वकं कार्योत्पत्तिः किन्तु सत्पूर्वकमेव जन्म युज्यते इति अद्वैतसिद्धान्तः। असतः जायते इति चेत् असन्निरुपाख्यं कारणं सुखादिरूपभावात्मकं कथमपि न स्यात्। सदसतोः तादात्म्यानुपपत्तेः। सत् कार्यं तु कारणव्यापारात् प्रागपि सदेव। अभावात्तु भावोत्पत्तौ सर्वत्र सर्वकार्यप्रसङ्गः। असदेव कारणं चेत् असदेव उत्पद्येत। अपि च 'असम्बद्धस्य जन्यत्वे तु सर्वं कार्यजातं सर्वस्मादुत्पद्येत।[69] तथा नैव दृश्यते। वन्ध्यापुत्रः मायया तत्त्वतो वा नैव जायते। असतः निःस्वरूपस्य न जन्म; नापि सतोऽपि तत्वतः जन्म। परस्परविरुद्धस्वभावयोः सदसतोः नैव संबन्धः। सत् सर्वदा सदेव। असत् सर्वदा असदेव। सत् आत्मैव सत्यम्। असत्तु अनात्मा व्यावहारिकप्रातिभासिकदशायां सदिवाऽनुभूयते। तथाऽपि तु ब्रह्मात्मस्वरूपमद्वितीयं जडात्मकद्वैतप्रपञ्चस्य जीवानामपि अधिष्ठानभूतं निरतिशयानन्दस्वरूपं चैतन्यमेकमेव सत्यं विजयते॥ "हृदयेन हि सत्यं जानाति हृदये ह्येव सत्यं प्रतिष्ठितम्"।[70] ईश्वरप्रसादाद्धि ब्रह्मात्मस्वरूपसत्योपलब्धिः, नेतरथा इति ईश्वरार्पणबुद्धया आत्मनो मोक्षार्थं जगद्धिताय च अनुष्ठीयमानं कर्मैव जनानामीश्वरानुग्रहस्य कारणमिति, आध्यात्मिकवादिनां भौतिकवादिनां च प्रायोगिकाद्वैतसत्यदर्शने परमादर्शः स्यात्। तथा च श्रीशङ्करानुयायिना श्रीनारायणगुरुदेवेन उपदिश्यते[71] 'ब्रह्मज्ञानिनाऽपि लोकहितार्थं कर्म कर्तव्यमिति'। तथा च भगवता उक्तम्—

"दग्ध्वा ज्ञानाग्निना सर्वमुद्दिश्य जगतां हितम्।
करोति विधिवत् कर्म ब्रह्मवित् ब्रह्मणि स्थितः"॥[72] इति॥

---

69. "असत्त्वान्नास्ति संबन्धः कारणैः सत्त्वसङ्गिभिः।
असम्बद्धस्य जन्यत्वमिच्छतो न व्यवस्थितिः"॥ इति सांख्यवृद्धाः; सां, तत्त्व; P. 32. 70. बृ., III, ix, 23.

71. "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति"। गीता., xviii, 61; "ईश्वरः एक एव, मनुष्याणां जातिरप्येकैव, तथा मतमपि एकमेवेति" अद्वैतसत्यदर्शनम्॥

72. दर्शनमाला., X, 5.

तृतीयोऽध्यायः ।

अद्वैते आत्मदर्शनम्

एष सर्वेषु भूतेषु गूढोऽत्मा न प्रकाशते ।
दृश्यते त्वग्र्यया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ॥

सर्वं ह्येतद् ब्रह्मायमात्मा ब्रह्म सोऽयमात्मा चतुष्पात्[1] । विश्वतैजसप्राज्ञ-विलक्षणं तुरीयं आनन्दस्वरूपमयमात्मैव ब्रह्म भवति । "अयमिति चतुष्पात्त्वेन प्रविभज्यमान प्रत्यगात्मतयाऽभिनयेन निर्दिशति "अयमात्मेति" । सोऽयमा-त्मोंकाराभिधेयः परापरत्वेन व्यवस्थितश्चतुष्पात्कार्षापणवन्नगौरिव । त्रयाणां विश्वादीनां पूर्वपूर्वप्रविलापेन तुरीयस्य प्रतिपत्तिरिति करणसाधनः पादशब्दः । तुरीयस्य पद्यते इति कर्मसाधनः पादशब्दः" ।[2] वेदान्तेन प्रतिपादितं ब्रह्म सर्वात्मकं नैव परोक्षं किन्तु अयमात्मैव । प्रथमे मन्त्रे सर्व यदुक्तं ओमित्येतदक्षरमिति, कालत्रयपरिच्छिन्नं त्रिकालातीतं च सर्वं ब्रह्मैवेति ।[3] ब्रह्मणोऽभिधेयस्य प्राधान्यं सर्वमेतद् ब्रह्मेति विधानात् । तादृशं ब्रह्मैव अयमात्मा ब्रह्मेति अभिधेयप्राधान्येन निर्दिशति । न च ब्रह्म परोक्षं भवति । तथा च एकस्यैव तत्त्वस्योभयथा निर्देशात् लिङ्गात् अभिधानाभि-धेयोभयविलक्षणपरब्रह्मज्ञानमेव विवक्षितम् । पर ब्रह्मैव आत्मा इति वेदान्तनिर्णयः । अयमिति प्रत्यक्षतोऽनुभूयमान आत्मैव ब्रह्म । "श्रोत्रं वै ब्रह्म" "मनो ब्रह्म"[4] इतिवत् नात्र परोक्षं ब्रह्म विवक्षितम् । यदा ब्रह्माऽऽत्मैव तदा तु सर्वाभिधानाभिधेयसाक्षित्वात् तद्विलक्षणत्वं ब्रह्मणः विवक्षितम् । लोके जन्तुषु प्रमातृप्रमाणयोर्भेदेऽपि यथा बाह्योऽर्थः घटादिर्न भिद्यते

---

1. मा. उ., I, 2. 2. Ibid. भाष्यम् ।
3. ओमित्येतदक्षरमिदं सर्वम् । मा., I, 1.; 'ब्रह्मैवेदं विश्वम्' । मु., II, ii, 12.
4. बृ., IV, i, 5–6.

तथा साक्ष्यपि न भिद्यते तस्मात् स आत्मेत्युच्यते[5]। साक्षिनानात्वेऽनवस्था स्यात्। प्रमाणप्रमात्रादीनां तदभावानां च साक्षी आत्मा नित्यशुद्धचैतन्यस्वरूपः एक एव[6]। असाक्षिकं चेन्नैव प्रमात्रादिसिद्धिः। तथा च सर्वत्र साक्षी एक एव सद्रूपेण वर्तते।

शरीरादयो यद्यप्यहङ्कारास्पदत्वेन प्रतिभासन्ते, ते नात्मानः। किन्तु इदङ्कारास्पदत्वेन ते अनात्मानः एव। इदङ्कारास्पदत्वं चिद्भास्यत्वम्। चिद्भास्यत्वं जडत्वम्। शरीरादीनां जडत्वे सिद्धेऽपि न तथा सर्वेषामनुभवः। तथात्वे आत्मस्वरूपम् अन्यथा च वर्णयन्ति।

आत्मवादः

पृथिव्यादिभूतानि चत्वारि तत्त्वानि तेभ्य एव देहाकारपरिणतेभ्यः मदिरादिभ्यो मादकशक्तिवत् चैतन्योत्पत्तिरिति चैतन्यविशिष्टो देह एव आत्मा प्रत्यक्षसिद्धः इति चार्वाकाः। तथा इन्द्रियस्य आत्मत्वमिति केचित्। मनसः आत्मत्वम् इत्यन्ये। क्षणिकविज्ञानम् आत्मेति सौगताः। शून्यमिति माध्यमिकाः। देहेन्द्रियातिरिक्तो देहपरिमाण आत्मेति जैनाः। वैशेषिकप्राभाकरमते तु आत्मा स्वयं न प्रकाशते। किन्तु स्वस्मात् भिन्नेन गुणभूतेन ज्ञानेन प्रकाशते। तस्मात् स्वप्रकाशत्वाभावात् जडत्वमेव। अतः तैः जडो विभुः कर्ता भोक्ता आत्मेत्यङ्गीक्रियते। भाट्टास्तु अहमस्मीति यदा प्रतीतिर्भवति तदा तादृशप्रतीतिनिरूपितमाश्रयत्वं विषयत्वं चैकस्यैव विरुद्धं भजते इति बोधांशेनाऽश्रयत्वं जडत्वेन विषयत्वमिति जडो बोधात्मक आत्मेति वदन्ति। सांख्याः पातञ्जलाश्च केवलज्ञानात्मक आत्मेति वदन्ति। किन्तु अद्वैतवेदान्तिनः श्रीशङ्कराचार्यास्तु अविद्यया कर्तृत्वादिभाक्, तत्त्वतः निर्धर्मकः परमानन्दबोधस्वरूप आत्मेति निर्धारयन्ति।[7]

---

5. मातृमानप्रभेदेऽपि प्रतिदेहं न भिद्यते।
साक्षी बाह्यार्थवद्यस्मात्स आत्मेत्युच्यते ततः।
व्यभिचारो मिथो यद्वत्प्रमात्रादेः ससाक्षिकः।
सर्वमात्राद्यभावस्य साक्षित्वान्न तथात्मनः॥ (बृ. वा., III, iv, 54–55.)

6. एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा।
कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च॥ (श्वे., VI, 11.)

7. सि. वि.. pp. 106–113.

जीवात्मस्वरूपविषये देहात्मवादमारभ्य नित्यशुद्धमुक्तात्मवादपर्यन्तं मतानि प्रदर्शितानि। तत्र मतभेदेन अनित्यं नित्यं चात्मस्वरूपम्।

प्रत्यक्षैकप्रमाणवादिनां लोकायतिकानां मतं पृथिव्यादिभूतचतुष्टयस्य केवलमङ्गीकारात् संहन्तुरभावे संघातो नोपपद्यते। अपि च, असंयुक्तानां पृथिव्यादिचतुर्णां तत्त्वानां संघातो देहश्चेद् धान्यराशौ धान्यकणानां मिथः संयुक्तानामपि तत्संयोगस्य किञ्चित्कार्यकारित्वाभावेनाऽकिञ्चित्करत्वात् असंयुक्तत्वं वा असंयुक्तानामपि पृथिव्यादीनां अन्तरालस्य सूक्ष्मत्वेन अदृश्यत्वा-संयुक्तत्वं वा भवेत्। तथापि संघातसिद्ध्युत्तरमपि चैतन्यमस्तीति वक्तुं शक्यते वा?। तथा च संघातात् प्राक् चेतनस्य संघातकर्त्तुः कस्यचिद् अभावात् संघातोपपत्तिरपि नास्ति। अतः संघातसिद्ध्यर्थं ततोऽपि प्राक् पृथिव्यादीनां प्रत्येकमात्मत्वं वक्तव्यं स्यात्। ते च चत्वारः आत्मानः स्वयं देहरूपेण सङ्घीभवेयुरिति वक्तव्यं स्यात्। तथापि चार्वाकमतं नैव संभवति, पृथिव्यादीनां प्रत्येकमात्मत्वाभावात्। तथा च शरीरस्य आत्मत्वं नैव युक्तम्। अपि च शरीरविनाशे आत्मा विनश्यतीति अनित्यत्ववादे कर्तृत्वभोक्तृत्वयोरेकत्वं न स्यात् अदृष्टस्य आश्रयत्वाभावात्। तथा कार्यभूतस्य अचेतनस्य ज्ञानविरुद्धत्वमेवायातम्। तथा च सर्वथा शरीरेन्द्रियादीनां मनसः प्राणस्य च आत्मत्ववादः[8] निरस्तः।] भूतनिराकरणेन भौतिकयोः प्राणमनसोः आत्मत्वनिरासः युक्तः। मनोनिराकरणेन मनोवृत्तेः क्षणिक-विज्ञानस्य देहातिरिक्तस्य कर्तृत्वभोक्तृत्वादिविशिष्टस्य निरासः संभवति[9]।

मनोदृश्यमिदं द्वैतं यत्किञ्चित्सचराचरम्।
मनसो ह्यमनीभावे द्वैतं नैवोपलभ्यते॥ (मा., III, 31.)

चराचरं निखिलमपि मनोदृश्यं भवति। यथावा लोके रज्जुः सर्पादिरूपेण विकल्प्यते तथैव मनोऽपि द्वैतरूपेण विकल्प्यते[10]। तच्चाविद्याकल्पितम्। तथा च

---

8. "कामः संकल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत्सर्वं मन एव"। बृ., I, v, 3.

9. तत्रैवं सति कर्तारमात्मानं केवलं तु यः।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः॥ गीता; XVIII, 16.

10. अध्यासस्तु मिथ्याप्रत्ययः कर्तृत्वभोक्तृत्वप्रवर्तकः। See. अध्यासभाष्यम्।

मनःसत्त्वे प्रपञ्चसत्त्वं मनसः असत्त्वे प्रपञ्चाभावः यथा मृद्भावे नियतभावो मृन्मात्रो घटादिः। मनसः निरोधे समाध्यवस्थायां तथैव स्वापावस्थायां च द्वैतं नैवोपलभ्यते। विश्वतैजसप्राज्ञादिषु सोऽहमिति प्रत्ययात् स्थानत्रयव्यतिरिक्तं सर्वकल्पनास्पदं नित्यशुद्धमुक्तस्वभावं[11] आत्मस्वरूपमेव सत्यम्, अन्यत् सर्वं कल्पितम् इति विज्ञायते। अन्तः बहिश्च सर्वमपि मनसा कल्पितमेवोपलभ्यते। कर्तृत्वभोक्तृत्वादिकमपि मनस एव, न तु शुद्धात्मनः। तथा च मनसः आत्मत्वाभावात्, मनोवृत्तेः क्षणिकविज्ञानस्य देहातिरिक्तस्य कर्तृत्वभोक्तृत्वादिविशिष्टस्य निरासः। ज्ञानेच्छासुखादीनां अन्तःकरणाश्रयत्वमेव। तथा पातञ्जलाभिमतमात्मनः भोक्तृत्व न तत्त्वतोऽस्तीति, भोक्तुः मनसः आत्मत्वनिराकरणेन निराकृतं भवति। दिगम्बराभिमतं आत्मस्वरूपम् वृद्धिक्षयशालि। वस्तुतः वृद्धिक्षयौ नात्मनः किन्तु देहस्यैव भवतः। देहात्मवादनिराकरणेन तन्मतमपि निराकृतम्।

ये चात्मत्वेन परेषामभिमतास्तु देहेन्द्रियादयः विनाशित्वात् कालपरिच्छिन्नाः एवेति न तेषामात्मत्वम् "पर एवात्मा देहेन्द्रियमनोबुद्ध्याद्युपाधिभिः परिच्छिद्यमानो बालैः शरीर इत्युपचर्यते। यथा घटाकाशाद्युपाधिवशादपरिच्छिन्नमपि नभः परिच्छिन्नवदवभासते। तद्वत्। तदपेक्षया च कर्मकर्तृत्वादिभेदव्यवहारो न विरुध्यते प्राक् तत्त्वमसीति आत्मैकत्वोपदेशग्रहणात्"[12]। तथा च देहादयो नात्मनः परिच्छिन्नत्वात् पटादिवत् इत्यनुमानमपि प्रमाणम्। कर्तृत्वादिकमपि नात्मनः। यावदेव चायं बुद्ध्याद्युपाधिसंबन्धः तावज्जीवस्य जीवत्वं संसारित्वं च।

गृहीते त्वात्मैकत्वे बन्धमोक्षादिसर्वव्यवहारपरिसमाप्तिः स्यात् इति सिद्धान्तः।

> जीवं कल्पयते पूर्वं ततो भावान् पृथग्विधान्।
> बाह्यानाध्यात्मिकांश्चैव यथाविद्यस्तथा स्मृतिः॥[13]

---

11. त्रिषु धामसु यद्भोज्यं भोक्ता यश्च प्रकीर्तितः।
    वेदैतदुभयं यस्तु स भुञ्जानो न लिप्यते॥ मा., I, 5.
12. सू. भा., I, ii, 6.
13. मा,. II, 16.

केवलमूढतैव पुरुषभेदकल्पना वेदार्थपरित्यागश्च । ये त्वाहुः वैशेषिकादयः इच्छादयः आत्मसमवायिनः इति तदप्यसत्, स्मृतिहेतूनां संस्काराणामप्रदेशवत्यात्मन्यसमवायात् ।

एकस्मिन् घटाकाशे रजोधूमादिभिः संयुक्ते सर्वेऽपि घटाकाशादयो रजोधूमादिभिः नैव संयुज्यन्ते। तथैव एकस्मिन् जीवे सुखादिसंयुक्ते अपरेऽपि[14] न तथैव सुखादिसंयुताः भवन्ति उपाधिभेदात् जन्ममरणादिकं शरीरस्यैव भवति न तु आत्मनः । तथा कर्तृत्वभोक्तृत्वानेकत्वविलक्षणः अकर्तृत्वाऽभोक्तृत्वैकस्वरूपः सन्मात्र आत्मैव सर्ववेदान्तेभ्यः विज्ञायते[15] । तथा च श्रुतिः—

"स एष महानज आत्माऽजरोऽमरोऽमृतोऽभयो ब्रह्माभयं वै ब्रह्माभयं हि वै ब्रह्म भवति य एवं वेद"[16] "एकमेवाद्वितीयम्"[17] ।

"य एवं यथोक्तमात्मानम् अभयं ब्रह्म वेद, सोऽभयं हि वै ब्रह्म वेद ब्रह्मैव भवति"। एष सर्वोपनिषदां संक्षिप्तोऽर्थः । एतस्यैवार्थस्य सम्यक् प्रबोधाय उत्पत्तिस्थितिप्रलयादिकल्पना क्रियाकारकफलाद्यारोपेण चात्मनि कृता[18] भवति ।

आत्मा सत्यम्

सद्रूपस्य आत्मनः सर्वत्र स्फुरणात् न कोऽप्यभावः आत्मनि संभवति। कालतः परिच्छिन्नस्यैव वस्तुतः प्रागभावः प्रध्वंसाभावश्च संभवति। देशतः परिच्छिन्नस्यैव अत्यन्ताभावः संभवति, भूतले घटो नास्तीतिवत्। वस्तुतः परिच्छिन्नस्यैव अन्यतः भेदसत्त्वाद् अन्योन्याभावः संभवति। देशकालाद्यपरिच्छिन्नस्य आत्मनः चतुर्विधोऽभावोऽपि नैव संभवति। तथा च 'मानाधीना

14. "यथैकस्मिन् घटाकाशे रजोधूमादिभिर्युते ।
न सर्वे संप्रयुज्यन्ते तद्वज्जीवाः सुखादिभिः" ।। मा., III, 5.
15. क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत । गीता., XIII, 2.
16. नान्योऽतोऽस्ति दृष्टा नान्योऽतोऽस्ति श्रोता । बृ., III, vii, 23.
17. छा., VI, ii, 1.
18. बृ. भा., IV, iv, 25.

मेयसिद्धि'रिति न्यायेन ध्वंसग्राहकप्रमाणसत्त्वे तयोः सिद्धिः स्यात्। तद्ग्रहणं आत्मनि न संभवति। प्रमाणं हि ज्ञातरि ज्ञानं जनयति। अनात्मा ज्ञाता न भवति जडत्वात्। नापि आत्मा, आत्मप्रागभावप्रध्वंसयोर्ग्रहीता आत्मैव चेत्, स्वयमेव स्वाभावग्राहक इति पर्यवसितं स्यात्, तच्च न युक्तम्। यः स्वो न भवति, स आत्मा न भवति। तथा च स्वः ग्रहीतात्मा तद्भिन्नो यः स्वः नात्मा भवितुमर्हति आत्मनः एकत्वात्। स्वास्तित्वकाले ग्राह्यभूतः स्वप्रागभावः स्वप्रध्वंसश्च नास्ति। आत्मनः नित्यसिद्धत्वान्न प्रागभावः प्रध्वंसश्च।

सद्रूपस्य आत्मनः सर्वत्रानुगमान्नैव अत्यन्ताभावश्च। सन्मात्र एव आत्मेति वेदान्तशास्त्रात् विज्ञायते। सद्रूपस्य तु घटोऽस्ति पटोऽस्ति इति सर्वत्रानुगमान्नैव अत्यन्ताभावः सिद्ध्यति। "सदेव सोम्येदम्"[19] इति प्रागुत्पत्तेरपि सद्रूपत्वसिद्धेः। यथा घटे नायं घटः इति घटभेदः न अनुभूयते तथा सद्वस्तुनि आत्मभेदः नैव संभवति आत्मनः एकत्वात्। "एकमेवाद्वितीयम्" इति अनात्मनां मिथ्याभूतानां वस्तूनां आत्मनि अध्यारोपितत्वे। तेषां अधिष्ठानभूततादात्म्येन वक्तुम् अशक्यत्वात् नात्मभेदः। तथैव अन्योन्याभावश्च नात्मनि संभवति।

तथा च चतुर्विधाभावरहितं सद्रूपमेव आत्मा न शून्यमिति सिद्धम्; किन्तु आत्मैव ब्रह्म सत्यमित्यद्वैतदर्शनम्। जाग्रत्स्वप्नसुषुप्तिषु स्थूलप्रविविक्तानन्दाख्यं भोज्यमेकं त्रिधाभूतम्। यश्च विश्वतैजसप्राज्ञाख्यो भोक्तैकः सोऽहमित्येकत्वेन प्रतिसंधानाद्द्रष्टृत्वाविशेषाच्च प्रकीर्तितः। स्वप्नसुषुप्त्योर्जागरितस्य च समानः एकः कालः नास्ति। स्वप्नसुषुप्त्योर्भूतकालभाक्त्वं जागरितस्य वर्तमानकालत्वं च स्वीकृत्य, योऽहं पूर्वं स्वप्नमद्राक्षं सुषुप्तिमन्वभवं वा सोऽहम् इदानीं जागर्मीति व्यपदेशः। यद्यपि स्वप्ने सुषुप्तावपि अनुभूतस्य स्मरणमेव भवति। किन्तु सोऽहमिदानीं जागर्मीति प्रत्यभिज्ञानमेव संभवति। न चान्येनानुभूतस्य अन्येन प्रतिसन्धानं संभवति सोऽहमन्वभवमिति। अतः एकोऽयम् आत्मा स्थानत्रयेऽपि इति विज्ञायते। जाग्रत्प्रतिबद्धानां संसारिधर्माणां स्थानत्रयसंसार्यात्मकदूषकत्वानुपपत्त्या अयमात्मा शुद्धः। अपि च जाग्रन्मनोधर्मस्य स्वप्नसुषुप्त्योरननुसंक्रमणानुपपत्त्याऽसङ्गश्च भवति। तथा च यथावा अग्निः स्वविषयान् काष्ठादीन् दग्ध्वा न हीयते वर्धते वा तथाऽयमात्मा अपि विश्वतैजसप्राज्ञादिषु

19. छा., VI, ii, 1.

तुज्ञानोऽपि न लिप्यते । तत्त्वतः तदसंबद्धः सन् सदा एकरूपेणैव वर्तते । मायावशादेव पादत्रयकल्पना भवति[20] ।

सतां विद्यमनानां स्वेनाऽविद्याकृतनामरूपमायास्वरूपेण सर्वभावानां विश्वतैजसप्राज्ञभेदानां प्रभवः उत्पत्तिः स्यात् । 'तुरीयाख्योऽहमस्मीत्यर्थः' । सर्वश्रुतिषु ब्रह्मण्यात्मशब्दप्रयोगात् आत्मशब्दस्य च प्रत्यगात्मशब्दप्रयोगात् च । "ब्रह्मैवेदम्"[21] "आत्मैवेदम् सर्वम्"[22] इत्यादि श्रुतिभ्यः सर्वस्यात्मत्वं ब्रह्मत्वञ्च युक्तमेव । अत एव अहं ब्रह्मास्मीत्यवधारणमनुभवश्च ।

तुरीयम् सत्यम्

तथा च सोऽयमात्मा परमार्थापरमार्थरूपचतुष्पाद्भवति । 'ओमित्येतदक्षरमिदं सर्वम्" "सर्वं ह्येतद् ब्रह्म" इति अभिधानाभिधेययोरेकत्वप्रतिपादनेन परमार्थत्वं अभिधानाऽभिधेयोभयविलक्षणं तत्त्वमेवं सूचितं भवति । तथा च परमार्थरूपेण एक एवात्मा संव्यवहाररूपेण चतुष्पाद्भवति । विश्वतैजसप्राज्ञाख्यं पादत्रयलक्षणं रज्जुसर्पादिसमम् अविद्याकृतम् अपरमार्थरूपं भवति, "तुर्यं परमार्थस्वरूपम्" सत्यम् अभिधीयते—

"नान्तः प्रज्ञं न बहिः प्रज्ञं नोभयतः प्रज्ञं न प्रज्ञानघनं न प्रज्ञं नाप्रज्ञम् । अदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्यमेकात्मप्रत्ययसारम् । प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः"[23] ।

"रज्जुरिव सर्पादिभिर्विकल्प्यमाना, स्थानत्रयेऽप्यात्मैक एवान्तःप्रज्ञादित्वेन विकल्प्यते यदा तदाऽन्तःप्रज्ञादित्वप्रतिषेधविज्ञानप्रमाणसमकालमेवात्मन्यनर्थप्रवृत्तिलक्षणफलकं परिसमाप्तमिति तुरीयाधिगमे प्रमाणान्तरं साधनान्तरं वा न मृग्यम्"[24] । लोके यथा वा महामत्स्यः महत्त्वात् नदीस्रोतोवशो न भवति, नद्याः पूर्वं चापरं चेत्युभे

20. स्वप्रकाशबोधरूपाख्ये आत्मनि अद्वैतेऽप्यनाद्यनिर्वचनीयाविद्या कल्पिता अनिर्वचनीया एवेति सिद्धान्तरहस्यम् । सि. वि., PP. 133–134.

21. मु., II, ii, 12.

22. छा., VII, xxv, 2.

23. मा., उ, I, 7. 24. Ibid. भाष्यम्.

कूले क्रमेण सञ्चरति, तथैव अयं जीवात्माऽपि स्वप्नजागरितरूपे अवस्थाद्वये यथेष्टं सञ्चरति[25]। अपि च महामत्स्यः यथा वा कूलद्वयव्यतिरिक्तः स्रोतोमध्ये कूलद्वयसंबन्धराहित्यादसङ्गः, तथैव जीवात्माऽपि स्वप्नजागरितावस्थासंबन्धरहितो भवति। सुषुप्त्यवस्थायाम् अविद्या स्थूलसूक्ष्मभावेन वर्तते इति नैव गृह्यते। तथापि सुखमहमस्वाप्समिति अनुस्मरणेन केवलं सुखानुभवं सुषुप्तौ आसीदिति ज्ञायते। किन्तु तात्त्विकं स्वरूपं नोपलब्धमिति तदपि अनित्यं भवति। तथा च जाग्रत्स्वप्नसुषुप्तिषु उपाधिभेदात् भिन्नोऽपि तत्त्वतः एक एवात्मा द्रष्टृत्वाविशेषात्। तथा च जाग्रच्चित्तं स्वप्ने नास्ति, स्वप्नचित्तं च जागरिते नास्तीत्येतदेव जाग्रत्स्वप्नयोर्विशेषानुभवः। सुषुप्तौ तु चित्तमेव नास्तीति अथवा चित्तं कारणस्वरूपेण वर्तते इति दर्शनाभावः। स्वतः चैतन्यस्वरूपस्यात्मनः द्रष्टुः विशेषदर्शनं वा तदभावो वा न विद्यते इति प्रतिस्थानम् अन्यादृशम्, अन्यादृशं द्रष्टृत्वं वा न शक्यं कल्पयितुम्। तथा अविद्यापरिकल्पितात् अवस्थात्रयादन्यः साक्षी तुरीयः सत्य.[26]। अतो अन्यत् दृश्यं मिथ्या[27] भवति। आविद्यकं त्रयमचेतनं परिच्छिन्नं दृश्यं च।

"तदेवं त्रयाणामप्यवस्थात्रयसहितानां विश्वतैजसप्राज्ञानामविद्यात्मकत्वात् दृश्यत्वेन च मिथ्यात्वात् अनुपहितः केवलः चैतन्यस्वरूप आत्मा सत्यमिति।

"मायामात्रमिदं द्वैतमद्वैतं परमार्थत" इति सिद्ध्यति। तथा च निखिलस्य द्वैतजातस्य मायाकल्पितत्वमेव अभिधीयते। सत्यं तु तुरीयम् अद्वैतमेव केवलं न त्वन्यत्[28]। सत्यं तु क्वचिदपि न कदाऽपि निवर्तते, निवर्त्यमानं वा ज्ञानेन। ज्ञाते द्वैतं न विद्यते"[29] इति तत्त्वविज्ञानेन

25. "तद्यथा महामत्स्यस्य उभे कूले अनुसञ्चरति पूर्वं चापरं चैवमेवायं पुरुष एतावुभावन्तावनुसंचरति स्वप्नान्तं च बुद्धान्तं च"। बृ., IV, iii, 18.
26. "न दृष्टेर्द्रष्टारं पश्येः"। बृ., III, iv, 2.
27. "अतोऽन्यदार्त्तम्" बृ., III, v, 1.
28. "मनसैवाऽनुदृष्टव्यम् नेह नानाऽस्ति किञ्चन"। (बृ., IV, iv, 19.) वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्। (छा., VI, i, 4.
29. मा., I, 18.

मिथ्याभूतस्य प्रपञ्चस्य द्वैतात्मकस्य विनाश एव उच्यते। 'विद्वान्नामरूपाद्विमुक्तः' इति श्रुत्या विदुषि सर्वदृश्योच्छेदः विधीयते । तथा च अन्तःप्रज्ञत्वादिनिवृत्तिसमकालमेव प्रमातृत्वादिनिवृत्तिः सम्भवति । तत्त्वज्ञानस्य तु द्वैतनिवृत्तिक्षणव्यतिरेकेण क्षणान्तरवृत्तित्व नास्ति । तथा च अविद्योच्छेदोपलक्षितः नित्यशुद्धमुक्तस्वरूपः आत्मा तुरीये निर्दिश्यते "अदृष्टमव्यवहार्यम्"-इत्यादिमन्त्रेण। तथा च "सर्वदृश्योच्छेदोपलक्षितपरमानन्दरूपात्मकरूपकैवल्यप्राप्तिस्तत्त्वज्ञानोत्तरमेव न तत्क्षण इति नोद्यश्यतावच्छेदकधीविषयत्वकालोनत्वं विधेये मोक्षलाभे विवक्षितम् '[30] । यथा वा रज्जुतत्त्वज्ञानेन कल्पितस्य सर्पाद्यात्मकस्य विलयः तथा सजातीयविजातीयस्वगतभेदशून्ये आत्मैकत्वसाक्षात्कारे अविद्याकल्पितानां विश्वतैजसादिपादविलयनं स्वतः संभवति। तथा च तुरीयमेकात्मप्रत्ययसारं सदेव सत्यं वेदान्तेषु निर्णीयते । सत्यं तु उच्यते श्रीशङ्करस्यापि परमाचार्येण गौडपादेन—

न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः ।
न मुमुक्षुर्न वै मुक्तः इत्येषा परमार्थता ।।[31] इति ।

अद्वये तुर्ये आत्मनि उत्पत्तिप्रलययोरभावः प्रतिपाद्यते श्रुत्या। यतो वा "आत्मैवेदं सर्वम्'[32]; 'इद सर्वं यदयमात्मा'[33]; 'यत्र हि द्वैतमिव भवति'[34]; 'य इह नानेव पश्यति'[35] इत्यादिश्रुतिभिः द्वैतस्य परमार्थतः असत्त्वमेवेति तुर्यं परमार्थसत्यमात्मरूपं शिवं शान्तं एकमेव सत्यमिति योगिभिरनुभूयते अद्वैतं[36] परमार्थसत्यम् ।। द्वैताभावज्ञापने एव वेदान्तशास्त्रव्यापारः । तथाहि उक्तम्—उपदेशादयं वादो ज्ञाते द्वैतं न विद्यते[37] ।" इति ।।

इति तृतीयोऽध्यायः समाप्तः ।।

---

30. चन्द्रिका., P. 5.
31. मा., II, 32.
32. छा., 7, xxv, 2.
33. बृ., II, iv, 6.
34. बृ., II, iv, 14.
35. क., II, i, 10.
36. "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन्दृष्टे परापरे" ।। मु., II, ii, 9.
37. मा., I, 18.

चतुर्थोऽध्यायः ।

विशिष्टाद्वैते सत्यदर्शनम् ।

ओं पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

सत् विद्यमानं वर्तमानम् । सत् परं ब्रह्मैव सत्यम् ।

विशिष्टाद्वैतमते ब्रह्म सत्यम्, जीवजडयोः श्रीनारायणस्य शरीरभावेन सत्यत्व निर्धार्यते श्रीरामानुजाचार्येण ।

सत् ब्रह्म—

चिदचिद्विशिष्टाद्वैततत्त्वं ब्रह्म सत् । ब्रह्मशब्देन नारायणः अभिधीयते । "नारायणः परं ब्रह्म"—"आत्मा वा इदमेक एवाग्र आसीत्[1] ब्रह्म वा इदमग्र आसीत्[2]" "सदेव सोम्येदमग्र आसीत्"[3] "एको ह वै नारायण आसीत्, न ब्रह्म नेशानो नेमे द्यावापृथिवी" (चतुर्वे; ।) इत्यादिना नारायण एव अभिधीयते । चिदचितोः जीवजडयोः नारायणस्य शरीरभावेन सत्यत्वम् । सदा शरीरी नारायणः विशिष्टवेषेण सत्यस्वरूपः । "ब्रह्मशब्देन स्वभावतो निरस्तनिखिलदोषोऽनवधिकातिशयासंख्येयकल्याणगुणगणः पुरुषोत्तमोऽभिधीयते । सर्वत्र बृहत्त्वगुणयोगेन ब्रह्मशब्दः । बृहत्त्वं च स्वरूपेण गुणैश्च । यत्रानवधिकातिशयः सोऽस्य मुख्योऽर्थः । स च सर्वेश्वर एव ।"[4] सर्वशेषी सर्वेश्वरः सर्वकर्माराध्यः सर्वकर्मफलप्रदः सर्वाधारः सर्वकार्योत्पादकः समस्तद्रव्यशरीरः श्रीनारायण एक एवेति सर्ववेदान्तेभ्यो निर्धार्यते ॥

---

1. ऐ., I, 1. 2. बृ., I, iv, 10.
3. छा., VI, ii, 1, 4. श्रीभाष्यम्., pp. 2–3.

श्रीनारायणस्य जगत्कारणत्वम्

"ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्"[5] "योऽसावसौ पुरुषः"[6] "पतिं विश्वस्यात्मेश्वरम्"[7] "यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपि वा। अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः"[8] "क्षेत्रज्ञं चापि मां विद्धि"।[9] "आत्मा वा इदमेक एव अग्र आसीत्"।[10] इत्यादिश्रुत्यादिना सूक्ष्म चदचिद्विशिष्टवेषेण नारायणस्यैव जगदुपादानकारणत्वमुच्यते। "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्"[11] इति श्रुत्या नारायणस्यैवाद्वितीयत्वम्। अपिच "तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत"[12] "स इक्षांचक्रे स प्राणमसृजत"[13] इत्यादिश्रुत्या निमित्तकारणत्व च तस्यैव भवति। यदि स्वभावतः प्रवृत्तिरुच्यते तर्हि प्रलयो न स्यात्। कर्मपरतन्त्रत्वात् जीवोऽपि न कारणम्। ब्रह्मरुद्रादयोऽपि सृज्यत्वसंहार्यत्वरूपकर्मवश्यत्वश्रवणात् जीवविशेषाः एव ॥

इदं ब्रह्मैव जगत उपादानं निमित्त सहकारि चेति अभ्युपगम्यते। कारणं त्रिविधम्—उपादानं, निमित्तं सहकारि च। तत्र कार्यरूपेण परिणमयोग्यं वस्तु उपादानम्। यथा घट प्रति मृत्तिका। उपदानवस्तुभूतस्य कार्यरूपेण परिणामं यः करोति स कर्त्तैव निमित्तकारणमुच्यते। यथा कुलालः। अत्र सूक्ष्मचिदचिद्विशिष्टस्य उपादानत्वम्। "बहु स्याम्" इति संकल्पविशिष्टो निमित्तम्। कार्योत्पत्त्युपकरणं वस्तु सहकारिकारणम्। ज्ञानशक्त्यादिविशिष्टः नारायणः सहकारिकारण च। "अविकाराय शुद्धाय"[14] इति निर्विकारविरोधित्वं ईश्वरस्योपादानाङ्गीकारे न स्यात्, चिदचिद्विशिष्टवेषेण विशिष्टस्य ईश्वरस्य जगद्रूपेण परिणामेऽपि विशेष्यस्य स्वरूपस्य परिणामाभावात्। यथा लोके ऊर्णनाभिः स्वरूपविकाराभावेऽपि

---

5. ई., 1.
6. बृ., V, xv, 1.
7. मा. ना., XI, 3.
8. Ibid., XI, 5.
9. गीता, XIII, 2.
10. ऐ., I, i.
11. छा., VI, ii, 1.
12. Ibid., VI, ii, 3.
13. प्रश्न., VI, 3–4.
14. वि. पु., I, 2, 1.

स्वशरीरभूतविशेषणद्वारा तन्तुजालरूपकार्यं प्रति उपादानं भवति तद्वत्।[15] मनुष्यादिशरीरविशिष्टे स्वरूपतो निर्विकारे पुंसि बाल्ययौवनस्थविरत्वस्थूलत्वादिकं सभवति तथैव विशिष्टस्वरूपेण ईश्वरे अपि विकाराश्रयत्वं संभवति । अपि च यथैक एव जीवात्मा विविधैरुपायैः आत्मनः सुखदुःखादीन् उत्पादयति स्वयमेव तेषां समवायिकारणं च भवति तद्वत् अत्रापि उपादानत्वं निमित्तत्वं च समञ्जसमेव । ईश्वरः कालाद्यन्तर्यामिवेषेण सहकारिकारणं च। तदुक्तं तत्त्वत्रयभाष्ये—"सृष्टौ प्रसक्तायां चतुर्दशभुवनस्रष्टुः समष्टिपुरुषस्य ब्रह्मणः, तेन सृष्टानां नित्यसृष्टिकर्तॄणां दशानां प्रजापतीनां सृष्टचपेक्षितस्य कालस्य परस्परम् उत्पादकानां सर्वजन्तूनां च तत्तत्प्रवृत्तयः सर्वाः स्वस्मिन् यथा पर्यवस्यन्ति तथा अन्तरात्मा सन्प्रवृत्तिहेतुः रजोगुणविशिष्टः सन् सृजति" इति । तथा च अखिलजगत्कारणत्वं भगवतो नारायणस्यैव ।

सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः प्रधानमित्युच्यते । सांख्याभिमतं प्रधानं न जगत्कारणं भवितुमर्हति "स ईक्षांचक्रे" "लोकान्नु सृजा" इति ईक्षणपूर्वकमेव सृष्टेरभिधानात् । अचेतनस्य नैव सृष्टिकर्तृत्वं स्यात् । अतः प्रधानं न जगत्कारणम् । वेदान्तवाक्यविचारेण तु सर्वज्ञस्य सर्वशक्तस्य नारायणस्यैव जगत्कारणत्वम् । "बहु स्याम्" इति बहुभवनसंकल्पः न साक्षात्, किन्तु शरीरद्वारा भवति । स्वज्ञानात् स्वस्माच्च इतरत् सकलमपि तच्छरीरमेव । तथा च स संकल्पो नामरूपविभागानर्हसूक्ष्मचिदचिद्वस्तुशरीरकतयैकरूपेणाऽवस्थितस्य विभक्तनामरूपचिदचिद्वस्तुशरीरकतया बहुप्रकारताविषयः भवति ।

"एकमेवाद्वितीयम्"[16] इति श्रुत्या एकशब्देन ब्रह्मव्यतिरेकेण निमित्तकारण निषिध्यते । कार्यगतबहुत्वावस्था कार्यानुसारेण कारणे ब्रह्मणि कल्पिता स्यात्तन्निवृत्तये एवकारः । अद्वितीयमित्यनेन ब्रह्मव्यतिरिक्तं जगतः उपादानकारण च निषिध्यते । "नेह नानास्ति किञ्चन"[17] इति श्रुत्या यस्य ब्रह्म कारणं न भवति नाप्यन्तर्यामि भवति, तादृश ब्रह्मभिन्नं वस्तु किञ्चिदपि नास्तीत्युच्यते । नतु ब्रह्मकार्यभूतस्य जगतो निषेधः प्रतिपाद्यते जगत्कारण-

15. मु. भा., I, i, 7.
16. छा., VI, ii, 1.
17. बृ., IV, iv, 19.

त्वस्य वेदान्ते एव प्रतिपादनात्। "यत्र हि द्वैतमिव भवति"।[18] "य इह नानेव पश्यति"[19] इत्यादिश्रुतीनां ब्रह्माभिन्नं, न किमप्यस्तीत्यत्रैव तात्पर्यम्।

जगत्कारणत्वात् कारणत्वोपयोगिनां सर्वज्ञत्वादिधर्माणां चाश्रयत्वात् नारायणः कारणभूतः सगुण एव न तु निर्गुणः, निर्गुणे जगत्कारणत्वस्य सुतरामसंभवात्। ज्ञानशक्तिबलैश्वर्यवीर्यतेजोरूपं गुणषट्कमपि कारुण्यादिवदेव न ब्रह्मस्वरूपान्तर्गतं, किन्तु ब्रह्मणा नित्यसंबद्धम्। यत्संबन्धं विना कदापि ब्रह्मणोऽवस्थितिः नास्ति; तथैव ब्रह्मसंबन्धं विना च न क्षणमपि तेषामव स्थितिः। "अपहतपाप्मा विजरः"[20] इति श्रुत्या पातकजरामरणशोकक्षुत्तृषादयः तत्र प्रतिषिद्धाः। अपिच "सत्यकामः सत्सङ्कल्पः"[21] इत्येवं शुभाः गुणाः एव परमात्मनि नारायणे उक्ताः। सर्वगुणनिषेधे 'सत्यकामः" इतीयं श्रुतिर्विरुध्येत। अतः निर्गुणपराणां श्रुतीनां हेयगुणपरत्वमेव। गुणानां तु उपास्यत्वमेव। तथा च समस्तकल्याणगुणात्मकः प्रकृतिपुरुषाभ्यां विशिष्टः नारायणः एक एव। अपि च नारायणस्यैव जगत्कारणत्वमोक्षप्रदत्वादि-गुणयोगः संभवति। सूक्ष्मं चिदविद्विशिष्टं ब्रह्मकारणं, स्थूलं चिदचिद्विशिष्टं ब्रह्मकार्यमिति विशिष्टाद्वैतसिद्धान्तः। ईश्वरस्य कार्यं प्रति उपादानत्व-निमित्तत्वकर्तृत्वप्रेरकत्वसहकारित्वनियन्तृत्वप्रशास्तृत्वोदासीनत्वादिकमुपपद्यते। बाल्ययौवनावस्थादयो दोषाः यथा शरीरगताः, न तु शरीरिणि जीवे एवं चिदचिच्छरीरिणि परमात्मनि दोषाः न संभवन्ति। अतः न निर्विकार-श्रुतिविरोधः स्वतः अविकारत्वात्। नियमेन यदाधेयत्वविधेयत्वादेः शरीर-लक्षणस्य जगति विद्यमानत्वात् जगच्छरीरी ईश्वरः तद्गतदोषैरसंस्पृष्टः भवति॥

श्रीनारायणः शरीरविशिष्टश्च। श्रीनारायणः कूटस्थनित्यः। एकेनैव स्वरूपेण सदा वर्तमानः कूटस्थ इत्युच्यते। मृदादीनां उपादानकारणत्वेन विकारयोग्यत्ववत् नारायणस्य न साक्षात् उपादानकारणत्व किन्तु शरीरद्वारैव। सूक्ष्मं परमात्मशरीरं प्रधानशब्दवाच्यं स्थूलजगद्रूपेण

---

18. बृ., II, iv, 14.
19. Ibid. IV. iv., क., IV, 10.
20. छा., VIII, i, 5.
21. Ibid.

परिणमति। तथा च परमात्मशरीरस्य सूक्ष्मरूपस्य स्थूलरूपेण परिणामेऽपि शरीरान्तर्यामिनः परमात्मरूपस्य कूटस्थनित्यत्वमेव। शरीरविशिष्टस्य तथा विकारित्वेऽपि न कोऽपि दोषः। "तत्त्वमसि"[22] इत्यादिश्रुतिभिः जीवानां जडानां च यद् ब्रह्मणा सह ऐक्यप्रतिपादनं तच्छरीरशरीरिभावमूलकं गौणमेव; न तु वस्तुतः। विशिष्टाद्वैतिनां शरीरविशिष्टः परमात्मैक एव इति सिद्धान्तः। तथा च ब्रह्मणः प्रकारीभूताः येऽनन्ताः जीवाः जडाश्च पदार्थास्तेषां नानात्वेऽपि ब्रह्मणः सकाशात् तेषां भेदेऽपि तद्विशिष्टस्य प्रकारिणो ब्रह्मणः एकत्वमेव। जीवानां मिथो भेदेऽपि प्रकारस्य ऐक्यात् जीवाद्वैतमिति व्यवहारः। एतदेव प्रकाराद्वैतमित्युच्यते। जीवभेदनिषेधवचनानि तु न जीवगतस्य वास्तविक-भेदस्य निषेधकानि; किन्तु शरीरभेदमूलको यो जीवेष्वारोपितो भेदोऽयं मनुष्योऽयं पशुरित्याकारकः तन्निषेधकान्येव। तथा च शरीरविशिष्टः नारायणः एक एव। यद्ब्रह्मणः शरीरभूतं न भवति तादृशं ब्रह्मव्यतिरिक्तं किञ्चिदपि नास्ति। एतदेव विशिष्टाद्वैतं प्रकार्यद्वैतमित्युच्यते।

नारायणः विभुस्वरूपः। विभुत्वं नाम व्यापकत्वम्। तच्च नारायणस्य स्वरूपतो धर्मभूतज्ञानतो विग्रहतश्च भवति। सत्यज्ञानानन्दत्वादयः परमात्मनः स्वरूपनिरूपकधर्माः। "सत्यं ज्ञानमनन्तं ब्रह्म[23] इति। जन्मादिसूत्रेण श्रुत्या[24] च ब्रह्मणः जन्मादिकारणत्वं व्यवस्थाप्य सत्य ज्ञानमित्यादिमन्त्रेण देशतः कालतः वस्तुतः परिच्छेदरहितनिरुपाधिकसत्तायोगि ज्ञानस्वरूपं ब्रह्म अभिधीयते।

धर्मभूतज्ञानम्—

श्रीनारायणस्य धर्मभूतज्ञानं नित्यसिद्धं सदेव। तत्तु स्वयंप्रकाशाचेतन-द्रव्यत्वे सति विषयित्वम्। विभुत्वे सति प्रकाशद्रव्यगुणात्मकं वा।

"न हि विज्ञातुर्विज्ञातेर्विपरिलोपो विद्यते"[25] इति श्रुत्या विज्ञानस्य नित्यत्वमभिधीयते। ज्ञानं स्वयं प्रकाशात्मकं सर्वसाक्षात्कारात्मकं च

22. छा., VI, viii, 7.
23. तै., II, 1.
24. "यतो वा इमानि भूतानि जायन्ते
येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति" तै; III, 1.
25. बृ., IV, iii, 30.

विद्यते । तथा च ज्ञानशक्तिबलैश्वर्यवीर्यतेजःसौशील्यवात्सल्यमार्दवार्जवसौहार्द-धैर्यसाम्यकारुण्यमाधुर्यगाम्भीर्यौदार्यस्थैर्यपराक्रमादयो भगवतो नारायणस्य अनन्तकल्याणगुणाः ज्ञानशक्तिविततीभूताः सन्तः विजयन्ते ।

"यः सर्वज्ञः सर्ववित् ।"[26]
"पराऽस्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञानबलक्रिया च"[27]

नित्यविभूतिः—श्रीनारायणः परव्यूहविभवान्तर्याम्यर्चावतारूपेण पञ्चप्रकारः।

"मम प्रकाराः पञ्चेति प्राहुर्वेदान्तपारगाः ।
परो व्यूहश्च विभवो नियन्ता सर्वदेहिनाम् ।
अर्चावतारश्च तथा दयालुः पुरुषाकृतिः" ।

(विष्वक्सेनसंहितायाम्)

पञ्चमूर्त्तिस्तु उपासकानुरोधेन भवति ।

"नित्यैवैषा जगन्माता विष्णोः श्रीरनपायिनी ।
विष्णोरेवानुरूपां वै करोत्येषात्मनस्तनूम्" ।। इति भगवतो नारायणस्य नित्यविभूतिः सती स्वयं प्रकाशमाना च ।[28] आनन्दावहत्वा-दानन्दनामिका च भवति । मङ्गलविग्रहस्त्वेवं, पुरुषस्य कौस्तुभाकारत्वम् । प्रकृतेः श्रीवत्सरूपत्वम् । महतो गदारूपत्वम् । सात्त्विकाहङ्कारस्य शङ्खरूपत्वम् । तामसाहङ्कारस्य शार्ङ्गत्वम् । ज्ञानस्य खड्गरूपत्वम् । अज्ञानस्य तदावरकत्वम् । मनसश्चक्रत्वम् । ज्ञानेन्द्रियाणां कर्मेन्द्रियाणां च शरीररूपत्वम् । स्थूलसूक्ष्मभूतानां वनमालाकारत्वम् । अस्त्रभूषणाध्याये भगवतो नारायणस्य अप्राकृतदिव्यमङ्गलविग्रहस्वरूपं वर्णयन्ति । तथाहि—

आत्मानमस्य जगतो निर्लेपगुणामलम् ।
बिभर्त्ति कौस्तुभमणिस्वरूपं भगवान् हरिः ।
श्रीवत्ससंस्थानधरमनन्ते च समाश्रितम् ।
प्रधानं बुद्धिरप्यास्ते गदारूपेण माधवे ।।

---

26. मु., I, i, 9. 27. श्वे., VI, 8.
28. "आदित्यवर्णं तमसः परस्तात्" श्वे., III, 8.

भूतादिमिन्द्रियादिं च द्विधाहङ्कारमीश्वरः।
बिभर्ति शङ्खरूपेण शाङ्गंरूपेण सस्थितम् ॥
चलस्वरूपमत्यन्तजवेनान्तरितामलम्।
चक्रस्वरूपं च मनो धत्ते विष्णुः करे स्थितम् ॥
पञ्चरूपा तु या माला वैजयन्ती गदाभृतः।
सा भूतहेतुसंघातो भूतमाला च वै द्विज॥ इति।

तथा च चिदचिद्विशिष्टाद्वैततत्त्ववर्त्मना नारायणः एक एव सत्यस्वरूपेण विजयते।

आश्चर्यवत्पश्यति कश्चिदेन-
माश्चर्यवद्वदति तथैव चान्यः।
आश्चर्यवच्चैनमन्यः शृणोति
श्रुत्वाऽप्येनं वेद न चैव कश्चित् ॥[29] इति भगवतैवोक्तम्।

जीवस्वरूपम्।

प्रत्यक्त्वचेतनत्वात्मत्वकर्तृत्वादीनि जीवलक्षणानि। प्रत्यक्त्वं नाम स्वयमेव स्वस्मै भ समानत्वम्। चेतनत्वं ज्ञानाश्रयत्वम्। आत्मत्वं शरीरप्रतिसंबन्धित्वम्। कर्तृत्वं संकल्पज्ञानाश्रयत्वम्। अपि च अणुत्वे सति चेतनत्वं, स्वतः शेषत्वे सति चेतनत्वं च भवति। अस्य तु परमात्मनः शरीरभावेन आधेयत्वविधेयत्वपराधीनकर्तृत्वादिभाक्त्वं स्वतः संभवति। "अयं नित्यः तथा सदा सद्रूपश्च। "यथाऽहं सर्वेश्वरः परमात्मा नित्य इति नात्र संशयस्तथैव भवन्तः क्षेत्रज्ञाः आत्मानोऽपि नित्याः एवेति मन्तव्याः। एवं भगवतः सर्वेश्वरादात्मनां भेद आत्मनां च परस्परं भेदः पारमार्थिक इति भगवतैव उक्तम्"[30]

न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः।
न चैव न भविष्यामः सर्वे वयमतः परम्[31] ॥ इति।

सद्रूपोऽयं जीवः परमार्थिकः। शरीरगतानित्यत्वादिकं शरीरिणि जीवे नास्ति। शरीरेन्द्रियादिव्यतिरिक्तः जीवः नैकः किन्तु बहवः इति "नत्वं

---

29. गीता., II, 29.
30. गी, भा., II, 12
31. गीता., II, 12.

नेमे जनाधिपाः" इति स्पष्टं अर्जुनस्य तथा इतरेषां जनाधिपानामपि भेदपुरस्सरं सत्त्वकथनात् ज्ञातुं शक्यते। नैव शरीरस्य आत्मत्व वक्तुं शक्यते, उत्पत्तिमत्वादिहेतुत्वात्[32]।

उत्पत्तिमत्त्वात् पारार्थ्यात्सन्निवेशविशेषतः।
रूपादिमत्त्वाद् भूतत्वाद्देहो नात्मा घटादिवत्॥
सच्छिद्रत्वाददेहत्वाद्देहत्वान्मृतदेहवत्॥ इति

देहात्मवादे तु—जन्मान्तराभावेनाकृताभ्यागमकृतविप्रणाशदोषप्रसङ्गः। सन्ति हि देहान्तरानुभाव्यस्वर्गस्वाराज्यादिसाधनविधायिन्यः श्रुतयः। किं च लोकेऽपि जातमात्रो हि जन्तुः स्तन्यादिवाञ्छायुक्त इति तदर्थप्रवृत्त्या निश्चीयते। तदवस्थस्य च रागादयो जन्मान्तरीयसंस्कारोद्बोधस्वीकारं विना न युज्यन्ते। तथा च विपरिणम्यमानेषु शरीरेषु अयमात्मा विपरिणामरहितः सन् अनुवर्तते। तथा जन्ममरणे आत्मान न स्पृशतः। सर्वदेहगतानाम् आत्मनाम् अजत्वात् नित्यत्वम्। प्रकृतिवत् सदसत्परिणामैस्तु नाऽन्वीयते जीवः शाश्वतत्वात्। तथा कालत्रयेऽपि अपूर्ववदनुभाव्यते इति पुराणश्च अयमात्मा षड्भावविकाररहितः सदा सद्रूपेणैव वर्तते। तथा चोक्तं—

न जायते म्रियते वा कदाचिन्नायं भूत्वाऽभविता वा न भूयः।
अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥[33] इति

जीवात्मा प्रतिशरीरं भिन्नः—

एकस्य उत्पत्तौ न सर्वेषां उत्पत्तिः। जगतीतले एकस्य मरणे न सर्वेषां मरणं च दृश्यते। एकस्य प्रवृत्तौ न सर्वेषां एकधैव प्रवृत्तिः। प्रतिपुरुषं स्वभावभेदात् त्रिगुणभेदात् जीवात्मा प्रतिशरीरं भिन्नः।[34]

चक्षुषा पश्यामि, श्रोत्रेण शृणोमि, वाचा वदामीत्यादिप्रत्ययात् बाह्येन्द्रियेभ्यो व्यावृत्तः अयं जीवः। इन्द्रियात्मवादिनामयम् अभिप्रायः, ज्ञानं इन्द्रियव्यापारफलम्। अतस्तदिन्द्रियसमवाय्यमेव भवितुमर्हति। ज्ञानाश्रयत्वं

---

32. क., II, 18. 33. गीता., II, 20.
34. जननमरणकारणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव॥ सां. का., 18.

च चेतनत्वम् इति। किन्तु एतन्मत न युक्तम् चक्षुषा पश्यामीति प्रतीतिविरोधात्। द्रष्टा हि चक्षुरादिभ्यो भिन्न एव प्रतीयते। किं च इन्द्रियाणां प्रत्येकं चेतनत्वं संभूय वा। नाद्यः इन्द्रियान्तरदृष्टस्येन्द्रियान्तरेण प्रतिसन्धानाभावात्। अस्ति च अनुभवः, "यमहम् अद्राक्षं तमहं स्पृशामीति" इति। तथा च इन्द्रियान्यतमस्य नाऽत्मत्वम्। संभूयापि नात्मत्वम्। नहि पञ्चभिः इन्द्रियैः संभूयैकं वस्त्वनुभूयते अनुसन्धीयते वा। किञ्चैकेन्द्रियविगमे मरणप्रसङ्गः। तत्तदिन्द्रियापाये तदिन्द्रियार्थस्मरणानुपपत्तिश्च। यथा च अन्धो रूपं न स्मरेत्। वधिरः शब्दं न स्मरेत्। तथा मनसा जानामीति मनसो ज्ञानकारणत्वप्रतीतेः, मम प्राणा इति व्यतिरेकोक्तेः, जानाम्यहमिति ज्ञानाच्च मनःप्राणज्ञानेभ्यो व्यावृत्तः जीवः इति सिध्यति। तथा च ज्ञानकरणतया अवगतस्य मनसः कथमपि न ज्ञाने कर्तृत्वम्। कर्तृत्वं हि स्वातन्त्र्यनियतम्। करणत्वं तु पारतन्त्र्यनियतम्। पारतन्त्र्यं तु पराधीनव्यापारत्वम्।

"तयोरन्यः पिप्पलं स्वाद्वत्ति"[35] इति मन्त्रेण स्पष्टं कर्मफलभोक्तृत्वं च शरीरस्थस्य जीवात्मनः एवाभिधीयते। यस्य कर्तृत्वं तस्यैव फलभोक्तृत्वमिति नियमः। तथा च जीवस्यैव कर्तृत्वं नेतरेषां तस्य फलभोक्तृत्वात्। तथा च आत्मत्वं न मनसः नापि प्राणस्य इति सिध्यति। तथा तु देहधारणयोग्यतारूपविशेषमापन्नो वायुरेव प्राणः। प्राणो नात्मा वायुत्वात् बाह्यवायुवत् इति। अपि च सुषुप्तौ इन्द्रियव्यापाररहिते आत्मनि प्राणस्य वृत्तिसद्भावदर्शनात् न तस्य आत्मत्वम्। 'आपोमयः प्राणः'[36] इति श्रुत्या च प्राणस्य जलविकारत्वमेवोच्यते। तथा च इन्द्रियप्राणादिभिन्नोऽयमात्मा परः सिध्यति।

इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः।
मनसस्तु परा बुद्धिः बुद्धेरात्मा महान् परः" ॥[37]

जीवः अणुपरिमाणः। उत्क्रान्त्यादेः सत्वात् 'प्रमाणानुसाराच्च'। विभुस्वरूपस्य गमनागमनाऽसंभवात् जीवः अणुपरिमाणो भवति। उत्क्रान्तिस्तु "तेन प्रद्योतनैष आत्मा निष्क्रामति"[38] इति श्रुत्या अभिधीयते। तथा गतिरपि उच्यते जीवस्य— 'ये वै के चास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति'[39]

35. मु., III, i, 1. 36. छा., VI, v, 4.
37. क., III, 10. 38. बृ., IV, iv, 2.
39. कौ., I, 2.

तथा च विभुत्वे तु उत्क्रान्त्यादयो न संभवन्ति । श्रुत्याऽपि जीवस्य अणुत्वमेव उच्यते । "आराग्रमात्रो ह्यवरोऽपि दृष्टः"[40] इति । तथा च अवरः जीवः आराग्रमात्रसमानः अणुपरिमाणः एवेति विज्ञायते । यद्यपि जीवात्मनः न सर्वशरीरव्याप्तिस्तथाऽपि तद्धर्मस्य ज्ञानस्य सर्वशरीरव्याप्त्या युगपदनेकविषयानुभवः संभवति ।[41] सूत्रकारैश्च जीवः अणुपरिणामः स्वयं ज्योतिश्च अभिधीयते । "गुणवद्वा लोकवत्"[42] इति सूत्रेण सर्वशरीरव्याप्त्या सुखाद्युपलब्धिस्तु ज्ञानद्वारेण उच्यते । श्रूयते च—"प्रज्ञया प्राणं समारुह्य प्राणेन सर्वान् गन्धानाप्नोति" ।

बालाग्रशतभागस्य शतधा कल्पितस्य च ।
भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते । [43]

जीवात्मनः आनन्त्यमपि धर्मभूतज्ञानद्वारैव संभवति[44] । धर्मभूतज्ञानव्याप्त्यैव सूक्ष्मानुप्रवेशत्वमपि संभवति । तथा च संसारदशायां स्वरूपज्ञानयोः संकोचात् आत्मा अणुपरिमाणः । तथापि मोक्षदशायां तु सर्वव्यापि स्वरूपं[45] ज्ञानं च जीवात्मनः प्रकाशते । 'अत्रायं पुरुषः स्वयं ज्योतिः'[46] अयमात्मानन्तरोऽबाह्यः कृत्स्नः "प्रज्ञानघन एव"[47] 'विज्ञानघन एव'[48] 'एष हि द्रष्टा श्रोता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः'[49] तथा च आत्मा स्वयंप्रकाशः, ज्ञानत्वात् धर्मभूतज्ञानवत् । ज्ञानाणुत्वामलत्वादयः अस्य स्वरूपनिरूपकधर्माः । अयं कर्ता भोक्ता शरीरी शरीरं च भवति । प्रकृत्यपेक्षया शरीरी भवति । ईश्वरापेक्षया शरीरं च भवति । तथा च चिद्रूपेण अयमात्मा परमात्मनः

---

40. श्वे., V, 8. 41. कौ., III, 6.
42. ब्र. सू., II, iii, 25. 43. श्वे., V, 9.
44. स चानन्त्याय कल्पते । श्वे, V, 9.
45. See बृ., III, vii, 3–23.
46. बृ., IV, iii, 9. 47. नृसि. उ., VIII, 5.
48. बृ.. II, iv, 12. 49. प्र., IV, 9.

शरीरमिति अजडत्वमिति स्वप्रकाशमानत्वं च सिद्धम्। "यो यः स्वस्मै प्रकाशते स सर्वोऽहमित्येव प्रकाशते यथा तथावभासमानत्वेनोभयवादिसम्मतः संसार्यात्मा। यः पुनरहमिति न चकास्ति, नासौ स्वस्मै प्रकाशते यथा घटादिः। स्वस्मै प्रकाशते चायं मुक्तात्मा। स तस्मादहमित्येव प्रकाशते। न च 'अहं' इति प्रकाशमानत्वेन तस्याज्ञत्वसंसारित्वादिप्रसङ्गः, मोक्षविरोधादज्ञत्व द्यहेतुत्वाच्च अहं प्रत्ययस्य"।[50]

जीवस्य त्रैविध्यम्

जीवः बद्धमुक्तनित्य भेदेन त्रिविधः। ब्रह्मादिकीटान्ताः सर्वेऽपि संसारिजीवाः बद्धाः भवन्ति। मुक्तजीवास्तु विमुक्तसंसाराः प्राकृतसूक्ष्मशरीररहिताः वैकुण्ठे भगवत्सन्निधिनिवासिनः आविर्भूताष्टगुणा भवन्ति। नित्यजीवास्तुः मूलत एव संसारबन्धरहिताः परमात्मेच्छानुवर्तिनः अनन्तगरुडादयः। ते स्वेच्छया लीलाविभूतिषु अवतारं धारयन्ति। एतेषु नित्यजीवेषु यथाऽधिकारं तारतम्यं वर्तते। मुक्तजीवेषु तारतम्य न स्ति। तेषां न कोऽप्यधिकारः न वा तेषामवतारधारणम्। मुक्तौ जीवः सच्चिदानन्दरूपस्य परमात्मनः सादृश्यं लभते, नतु ऐक्यम्। जीवो ज्ञातृस्वरूपः आनन्दस्वरूपश्च तथा कर्ता भोक्ता च। तस्य शरीरं प्रकृतिजन्यं पाञ्चभौतिकं, स च स्वयं परमात्मनः शरीरभूतो जीवात्मा लिङ्गदेहोपाधिना संसरति। स च लिङ्गदेहः—प्राकृतोऽनादिश्च। उपाधिभूतलिङ्गदेहत्यागेन जोवेन मोक्षो लभ्यते। मोक्षावस्थायामपि जीवस्य ज्ञातृत्वं न हीयते। "ब्रह्मात्मभावापरोक्षनिर्धूतनिरवशेषाविद्यानामपि वामदेवादीनां" 'अहम्" इत्येवात्मानुभवदर्शनाच्च।[51] श्रुत्यामपि— 'तद्धैतत्पश्यन्नृषिर्वामदेवः प्रतिपेदेऽहं मनुरभवं सूर्यश्चेति।'[52]

"अहमेव समवर्तामि भविष्यामि" इति श्रवणाच्च। जीवस्य कर्तृत्वादिकं न स्वाभाविकं[53] अज्ञानवशात्[54] आत्मन्यध्यासितं, केवलं गुणाना-

---

50. श्री. भा., p. 79. 51. श्री. भा., p. 79.
52. बृ., I, iv, 10. 53. 1bid.
54. "अज्ञानं नाम स्वरूपाज्ञानम्, अन्यथाज्ञानं विपरीतज्ञानं वा। (श्री. भा., p. 79.)

मेव[55] नत्वात्मनः॥ "जीवात्मानः स्वयं असंकुचितापरिच्छिन्ननिर्मलज्ञान-स्वरूपाः सन्तः कर्मरूपाविद्यावेष्टिताः तदनुगुणसुखदुःखोपभोगरूपसंसारप्रवाहं प्रतिपद्यन्ते।[56]

आत्मा शेषः समश्च ।

आत्मा तु स्वतः ज्ञानैकाकारतया सद्रूपेण समः। विषमाकारस्तु प्रकृतेरेव। ब्रह्म सच्छब्दप्रत्ययमात्रस्वरूपम्।[57] तच्छेषतया जीवात्मनोऽपि सद्रूपत्वमेव। तथा च आत्मसाम्ये स्थिताश्चेत् ब्रह्मणि स्थिता एव ते आत्मानः ब्रह्मणि स्थितिरेव संसारजयः। आत्मसु ज्ञानैकाकारतया साम्यमेवानुसंदधाना मुक्तः एव भवन्ति। भगवता उच्यते—

"इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः।
निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः" ॥ [58]

तथा च श्रुतिः—

"सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः" ।[59] सदाश्रित्यैवात्मनः स्थितिः। सुषुप्तौ तु सता संगतो भवति अयं जीवः, तदा न बाह्यमान्तरं वा किञ्चित् जानाति। किन्तु आत्मानमाश्रित्यैव सत्संपत्ति-र्भवति[60]। तस्यैवंभूतस्य आत्मनः भगवच्छेषैकरसता, तन्नियम्यता, तदेकाकारता च तत्तच्छरीरतत्तनुप्रभृतिभिः शब्दैः, तत्सामानाधिकरण्यं च श्रुतिस्मृतीतिहासपुराणादिषु प्रतिपाद्यन्ते। तथा च भगवच्छेषतया सद्रूपः

---

55. प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।
अहंकारविमूढात्मा कर्त्ताऽहमिति मन्यते" ॥ गीता. III, 27.

56. वे. सं. p. 79.

57. सकलेतराज्ञानविरोधिनः सच्छब्दप्रत्ययमात्रभाजः परस्य ब्रह्मणः।
श्री. भा., p. 79.

58. गीता., V, 19. 59. छा., VI, viii, 4.

60. "यत्रैतत्पुरुषः स्वपिति नाम सता सोम्य तदा सम्पन्नो भवति" VI, viii, 1.

जीव: ।।[61] "मम साधर्म्यमागता:" ।[62] "ब्रह्म वेद ब्रह्मैव भवति" ।[63] 'लोकेषु विष्णोर्निवसन्ति केचित्समीपमृच्छन्ति च केचिदन्ये । अन्ये तु रूपं सदृशं भजन्ते सायुज्यमन्ये स तु मोक्ष उक्त' ।। इति

जडं सत्यम्

जडम् अमिश्रसत्त्वरहितम् । जडत्वं परत एव भासमानत्वम् । जडं द्विविधम्—प्रकृतिकालभेदात् ।

प्रकृतिः

सत्त्वरजस्तमोरूपगुणत्रयाश्रयरूपा प्रकृतिः । सा नित्याऽक्षराविद्यामायाशब्दवाच्या च भवति । इयं प्रकृति: चतुर्विंशतितत्त्वात्मिका भवति । प्रकृतिर्महत्तत्त्वमहंकारो मनः पञ्च ज्ञानेन्द्रियाणि पञ्च तन्मात्राणि पञ्च महाभूतानि चेति तानि तत्त्वानि । एतेषु प्रथमतत्त्वं—प्रकृत्याख्यं सर्वेषां विकारभूतानां जडानां मूलकारणम् । एतदतिसूक्ष्मं सृष्ट्यादौ परमात्मनः इच्छया प्रकृतौ परिणम्यमानायां यथा यथा सूक्ष्मता हीयते तथा तथा अवस्थान्तरं भवति । तत्र प्रथमावस्था तम इत्यभिधीयते द्वितीयावस्थाक्षरं तृतीयावस्थाऽव्यक्तं च ।[64] इदं भगवत्संकल्पाधीनगुणवैषम्यात्कार्योन्मुखावस्थाऽव्यक्तशब्देनोच्यते । अव्यक्तानन्तरं जायमाना: सर्वे परिणामाः व्यक्ताः । तत्र प्रथमपरिणामो महत्तत्वम् । अत्र गुणत्रयसाम्यं नास्ति । त्रिषु अन्यतमो गुणः प्रबलः भवति । महत्तत्व ब्रह्मण: शरीरम् । अस्मात् अन्तःकरणवृत्तिबुद्धिनाम्नी निश्चयाख्या जायते । महत्तत्त्वात्सत्वगुणप्राधान्येन जायमानः सात्विकोऽहंकारो वैकारिक इत्युच्यते । अस्मात्सात्त्विकाहङ्कारात् पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि मनश्चोत्पद्यन्ते । एतदेव मनः स्मृत्यादीनां साधनं, सर्वेन्द्रियाणां प्रेरकं संसारबन्धकारणभूत च तथा प्रकृतेः बन्धकारणत्वम् ।। 'सत्त्वरजस्तमांसि त्रयो गुणाः प्रकृतेः स्वरूपानुबन्धनाः स्वभावविशेषाः प्रकाशादिकार्यैकनिरूपणीयाः प्रकृत्यवस्थायामनुद्भूतास्तद्विकारेषु महदादिषू-

---

61. "निरञ्जनः परमं साम्यमुपैति" । III, i, 3.

62. गीता., XIV, 2. 63. मु., III, ii, 9.

64. सत्वं रजस्तम इति गुणाः प्रकृतिसंभवाः ।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ।। गीता., XIV, 5.

द्भूता महदादिविशेषै रारब्धदेवमनुष्यादिदेहसंबन्धिनमेनं देहमव्ययं स्वतो गुणसंबन्धानर्हं देहे वर्तमानं निबध्नन्ति" ।[65] तथाचोक्तम्—

ब्रह्माद्याः सकला देवा मनुष्याः पशवस्तथा ।
विष्णुमायामहावर्तमोहान्धतमसावृताः ॥

प्रकृतिः शरीरम्

बद्धानां ब्रह्मादिकीटपर्यन्तानां ज्ञानानन्दयोः तिरोधायकत्वं प्रकृतेरेव । तथा सर्वेषामपि संसारित्वं च मायया संभवति । इयं ईश्वरस्य क्रीडासाधनभूता देशभेदेन कालभेदेन च सदृशाऽसदृशविकारोत्पादिका च भवति । सत्वं सुखसङ्गद्वारेण पुरुष बध्नाति । रजः रागतृष्णासङ्गद्वारेण बन्धहेतुः । तमस्तु विपरीतज्ञानमनवधानमालस्यं च जनयति । तथा त्रिगुणात्मिका इयं माया संसाकरारिणी इति सिद्धम् । तथा च सदात्मानम् एकरूपमपि देहाकारपरिणतया प्रकृत्या स्वरूपनिबन्धित्वेन परस्परविरुद्ध कार्यमुत्पाद्यते । अव्यक्तादुत्पन्नस्य कार्यप्रपञ्चस्य अव्यक्ते एव विलयनं च संभवति ।[66] प्रकृत्याः महदादिरूपेण आत्मनः शरीररूपेण परिणामित्वं स्वभावः । तथा सेयं प्रकृतिः आत्मनः शरीररूपेण परिणमते, तथा कारणरूपेण परमात्मनः अचिद्रूपशरीरात्मत्वं भजते । तथा शरीररूपेण प्रकृतिः सद्रूपा भवति । अचेतनात्मिका प्रकृतिः ईश्वरस्य एकं नियमस्थानम् ।

कालस्यापि ईश्वराधीनत्वम्

अचिद्विशेषः कालः गुणत्रयरहितः अयं जडद्रव्यविशेषः विभुः । स च द्विविधः खण्डोऽखण्डश्च । खण्डो निमेषकाष्ठाकलामुहूर्तादिरनित्यः । अयमेव युगपत्क्षिप्रादिव्यवहारहेतुरतीतादिव्यवहारहेतुश्च । अखण्डकालस्तु नित्यः । ईश्वरश्च वैकुण्ठलोकातिरिक्तस्थले कालाधीन एव सृष्ट्यादिकं करोति । वसन्त एव पुष्पोद्गम इत्येवं कालविशेषनियमेनैव तत्तद्विकारजातोत्पत्तिः । ईश्वरः स्वसंकल्पितकालनियमानुरोधेनैव निखिलकार्याण्युत्पादयति । एतदेव

65. गीता., भा., XIV, 5.
66. "अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत" ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ।। गीता., II, 28.

कालस्य स्वातन्त्र्यम् । वैकुण्ठे तु विभुत्वाद्विद्यमानस्यापि कालस्येश्वराधीनत्वमेव न कथमपि स्वातन्त्र्यम् ।

प्रकृतिकालयोः परमेश्वरशरीरभावः

प्रकृतिः कालश्चेति द्वयं जडं भवति । चिदचिद्विशिष्टस्य परमेश्वरस्य यथा वा जीवस्य शरीरभावेन सद्रूपत्वं तथा जडस्यापि ईश्वरशरीरभावेन सद्रूपत्वमेव सिद्धम् ।

यस्य पृथिवी शरीरं यस्याक्षरम् । यस्य मृत्युश्शरीरं यस्यात्मा शरीरम् ।। तथा च ब्रह्मव्यतिरिक्तस्य सर्वस्यापि वस्तुनः ब्रह्मणः शरीरात्मत्वात् जडभूतयोः प्रकृतिकालयोरपि परमेश्वरशरीरभावेन सदा सद्रूपत्वम् इति सत्यम् । अशेषचिदचिच्छरीरः परमेश्वरो नारायणः भक्तिप्रपत्तिभ्यामाराधितो मोक्षप्रदो भवति । इदं विशिष्टाद्वैतसिद्धान्तरहस्यं 'वेदाहमेत पुरुष महान्तम्' इत्युपक्रम्य 'नान्यःपन्था विद्यते अयनाय' इति श्रुत्या निर्धारितम् । श्रीरामानुजाचार्येण लौकिकानाम् अभ्युदयनिश्रेयसोपलब्धये भक्तेः तथा प्रपत्तेः परमप्राधान्यम् अभ्युपगम्यते इति तत्त्वम् अद्वैतं प्रायोगिकसिद्धान्त.विरुद्धं भवतीति ज्ञातुं शक्यते । तथाहि श्रीशङ्कराचार्यैः जनानाम् अभ्युदयनिश्रेयसोलब्धये ईश्वरप्रसादस्य कारणत्वं स्पष्टमङ्गीक्रियते गीताभाष्यावसरे ।[67] व्यावहारिकदशायां परमेश्वरमवलम्ब्य ईश्वरार्पणबुद्धया कर्मानुष्ठानेन चित्तशुद्धिद्वारा दुःखनिवृत्तिः स्यात् । तथा चोक्तं भगवता श्रीशङ्कराचार्येण ईश्वरार्पणबुद्धया अनुष्ठीयमानं कर्म चितशुद्धये भवति इति । वेदान्ताचार्यैः विशिष्य श्रीरामानुजाचार्येण श्रीमध्वाचार्येण च चित्तशुद्धयर्थम् अद्वैतदर्शनपद्धतिरेव प्रायेण अनुसृता इति वेदान्ततत्वज्ञैः ज्ञातुं शक्यते । तथा च श्रुतिः—

"सत्यमेव जयति नानृतम्"[68] इति ।।

---

67. *See* गीता भा., II, 48, xviii, 65.

68. मु., III, i, 6.

पञ्चमोऽध्यायः ।

द्वैतवेदान्ते सत्यदर्शनम् ।

ओं सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै ।
तेजस्वि नावधीतमस्तु मा विद्विषावहै । ओं शान्तिः शान्तिः शान्तिः ।।

सत्—सदिति गृह्यमाणं यथाभूतम् अविपरीतं तत्त्वम् ।।

प्रमितिविषयत्वे सति अनारोपितत्वं तत्त्वम् ।[1] साक्षात्प्रमितिविषयत्वं वा विधिप्रमितिविषयत्वं वा अनारोपिते तत्त्वे संभवति । तस्य भावः तत्त्वम् ।[2] तत्त्वमेव सत्यम् । सतः भावः सत्ता । सता अस्तीति सत्यम् । "यत्र धर्मी सन् तत्रैव सत्यः" । सत्यं ब्रह्म, तथा जीवा जडपदार्थाश्च सत्यभूताः ।।

ब्रह्म सत्यम्

सर्ववेदान्तवाक्येभ्यः परं ब्रह्म सदिति विज्ञायते । "सर्वाणि हि वेदान्तवाक्य नि असंख्येयगुणाकारं परं ब्रह्म प्रतिपादयन्ति"[3] । सर्वज्ञत्वसर्वेश्वरत्वसर्वान्तर्यामित्वसौन्दर्यौदार्यादिविशिष्टत्वेन निखिलवेदान्तेभ्यो विज्ञायमानं ब्रह्मैव । ब्रह्मशब्देन विष्णुरेव अभिधीयते ।

वेदे रामायणे चैव पुराणे भारते तथा ।
आदावन्ते च मध्ये च विष्णुः सर्वत्र गीयते" इति हरिवंशे उक्तम् ।

---

1. "तत्त्वमनारोपितम् प्रमितिविषय इति यावत् ।
   तेन तस्य भावः तत्त्वमिति खण्डनानवकाशः" । (तत्त्वसं टीका p.10)
2. "तस्य भावस्त्वतलौ" इति सूत्रात् तस्य भावः तत्त्वमित्यर्थः" ।
   (तत्त्वविचारणम् p. 11)
3. "विज्ञेयं परमं ब्रह्म ज्ञापिका परमा श्रुतिः"
   (वि. त. p. 56—कात्यायनश्रुतिः)

(b) "सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात्" ब्र., सू. III, iii, 1.

"सृष्ट्यादिकर्त्ता यः तद् ब्रह्म स हरिः स्मृतः", "जगज्जन्मादिकारणः सर्वज्ञः सर्वशक्तिसमन्वितः हरिरेव ज्ञातव्यः"—इति अथातो ब्रह्मजिज्ञासा"[4] इत्यनेन सूत्रेण अभिधीयते"। अपि च शास्त्र योनिः प्रमाणं अस्येति व्युत्पत्त्या 'शास्त्रयोनित्वाद्'[5] इति सूत्रेण वेदादिशास्त्रेण च विष्णुरेव अवगम्यते। अथ नामानि विश्वानि न सन्ति लोके यदाऽविरासीदनृतस्य सर्वम्। नामानि सर्वाणि यमाविशन्ति तं वै विष्णुं परमुदाहरन्ति (भालेयश्रुतिः।)

उत्पत्तिस्थितिसंहारनियतिज्ञानमावृतिः।
बन्धमोक्षौ च पुरुषाद्यस्मात्स हरिरेकराट्॥ इति(स्कन्दे), अपि च
जातो जनिष्यमाणश्च वर्तमानस्तथैव च।
विष्णोः सृष्ट्यादिकर्तृत्वं लभते न कुतश्चन।

इति श्रुत्यादिप्रमाणानुसारेण विष्णोरेव जगज्जन्मादिकर्तृत्वं स्वातन्त्र्यं चेति विज्ञायते[6]। तथा च उपक्रमादिभिः लिङ्गैः भगवान् स्वतन्त्रो विष्णुरेव वेदान्तादिशास्त्रेषु सर्वशब्दाभिधेयः भवति। न तु रुद्रादयः [7]। तथा च स्वतन्त्रं तत्त्वं सर्वगुणाश्रयो दोषरहितो विष्णुरेव इति सिद्धम्[8]।

परमो विष्णुः

"विष्णुः परमो मतः" इति परमपदोक्तं मुख्यत्वं सजातीयविजातीय राहित्यरूपम्। तथा च विष्णुः विलक्षणशब्दरूढिमान् स्ववृत्तिब्रह्मशब्दाश्रयः

---

4. ब्र. सु., I, i, 1. 5. ब्र सू., I, i, 3.

6. यतो वा इमानि भूतानि जायते।
येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति॥ तै., III, 1.
सृष्ट्यादिकारणत्वस्य गम्यत्वादागमादिभिः।
कारणं भगवान् विष्णुः शास्त्रगम्यः सनातनः॥

7. उपक्रमादिभिर्लिङ्गैः सम्यग्वेदे विचारिते।
विष्णुरेव हि तद्गम्यो न रुद्राद्याश्च जातुचित्॥

8. "उक्तं च सुधायां सिद्धत्वात् ब्रह्मशब्दस्य विष्णौ स्पष्टतया श्रुतौ" इति
(अनुभाष्यम्—ब्र. सू., I, i, 3.)

वस्त्वन्तरशून्यत्वात् इति रूढिसाधकानुमानम्। सा रूढिः श्रौतकविशब्दबला-द्विद्वद्रूढिरित्युच्यते। 'यस्य प्रसादात्परमार्तिरूपादस्मात्संसारान्मुच्यते नापरेण। नारायणोऽसौ परमो विचिन्त्यो मुमुक्षुभिः कर्मपाशादमुष्मात्'[9] इति नारायणश्रुत्या पैङ्गिश्रुत्या च नारायणः परमः इति विज्ञायते।

तथा च जन्माद्यस्येति तेनैतद्विष्णोरेव स्वलक्षणम् इत्यनुव्याख्यानोक्तं स्वरूपलक्षणम्। सच्चिदानन्देति त्रयं परमात्मनः स्वरूपम्। जगज्जन्मादि-सामर्थ्यमपि परमानन्दादिवत् यावल्लक्ष्यभाविरूपस्वरूपलक्षणमेव वह्नेः दाहशक्तिवत्। जन्मादिकारणत्वं नाम जगज्जननपालनसंहरणनियमनादि-शक्तिरित्युक्तया फलोपधानस्याऽविवक्षितत्वात् पालनसंहरणादेरेकदा विरोधः इति प्रत्युक्तं भवति[10]। "एष नित्यो महिमा"[11] "स्वाभाविकी ज्ञानबलक्रिया च" इत्यादिश्रुत्या सगुणं सर्वज्ञत्वादिविशिष्टं ब्रह्मैव अभिधीयते। श्रुत्यादि-सङ्गतिस्तु तद्विजिज्ञासस्व तद्ब्रह्म इति श्रुत्युक्तं ब्रह्म जिज्ञास्यं इत्युच्यते, तस्य विष्णुत्वं यावन्न साध्यते तस्य गुणपूर्त्यसिध्या भेदकाभावेन न संभवति[12]। तथा चोक्तम्

कृष्णध्यानच्छलेनैव स्वयं भगवतोऽब्रवीत्।

अस्योद्भवादिहेतुत्वं साक्षादेव स्वलक्षणम्॥ इति। "युक्तं च विष्णोः सर्वोत्तमत्व एव महातात्पर्यं सर्वागमानाम्[13]" "अतो विष्णोस्सर्वोत्तमत्व एव महातात्पर्यं सर्वागमानाम्"[14] "सर्वज्ञं सर्वकर्त्तारं नारायणमनामयम्।

---

9. वि. त., p. 129.

10. शक्तयः सर्वभावानामचिन्त्यज्ञानगोचराः।
यतो यतो ब्रह्मणस्तु सर्गाद्याभावशक्तयः॥ वि. पु. I, iii, 2.

11. उत्पत्तिस्थितिसंहारनियतिज्ञानमावृतिः।
बन्धमोक्षौ च पुरुषाद्यस्मात्स हरिरेकराट् इति स्कान्दे॥
(वि. त, 129.)

12. "अज्ञानं ज्ञानदो विष्णुः ज्ञानिनो मोक्षदश्च सः।
अनानन्दश्च मुक्तानां स एवैको जनार्दनः इति च।" वि. त., p, 129.

13. वि. त., p. 127.

14. Ibid. p. 160.

सर्वोत्तमं ज्ञापयन्ति महातात्पर्यमत्र हि, इति नारदीये[15] तथा च विष्णोः सर्वोत्तमत्व एव महातात्पर्यं सर्वागमानाम्[16] एकमेवेत्यतः प्राह नारायणमियं श्रुतिः। समे द्वितीयशब्दः स्याददद्वितीयोऽसमत्वतः। साधिकः कुत एवास्याह परमाश्रुतिः इति समसहितायाम्[17]। तथा च हरिरेव स्वतन्त्रः सच्छब्दवाच्यो भवति। यत् स्वसत्तादौ स्वस्यैव तन्त्रम् अधीनं न तु परापेक्षं तत् स्वतन्त्रमित्युच्यते। स्वतन्त्रस्तु भगवान् विष्णुरेव।

स्वतन्त्रमस्वतन्त्रं च द्विविधं तत्त्वमिष्यते।
स्वतन्त्रो भगवान् विष्णुः भावाभावौ द्वियेतरत्॥[18]

भगवानिति विष्णोः स्वातन्त्र्योपपादकम्[19]। त्रिकालेऽपि सर्वज्ञः सर्वशक्तः सद्रूपः हरिरेव सर्वोत्कर्षेण वर्तते।

"सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्"[20]।

एक एवाद्वितीयो भगवान् तत्सदृशः परो नास्तीति च श्रुतिः। एको भगवान् तत्सदृशपरो न स्तः इति च विजातीयाभावे येनाश्रुतं श्रुतं भवति इत्यादि विशेषणं च व्यर्थम् यस्य कस्यचित् ज्ञानं तज्ज्ञानमेव भवति इति। अज्ञानमपि ज्ञानमेव भवति भेदभावात्। न च मिथ्यासत्यमिति भेदः। तस्यैव विजातीयत्वप्राप्तेः तद्भेदस्य तदभेदस्य सत्यत्वप्रसङ्गाच्च। मिथ्यासत्ययोरैक्ये इदं सत्यमिदं मिथ्येति भेदाभावात् जीवेशभेदादेरपि सत्यत्वप्रसङ्गः। अतः परमार्थं ब्रह्मान्यन्मिथ्येति अपि न युज्यते। अतः सजातीयः स्वगतभेदोऽधिकाऽसंख्यविजातीयं चात्र निषिध्यते। सर्वोत्तमत्वात्सन्नाम हरिर्नारायणः प्रभुः॥[21]

सद्रूपः एक एव विष्णुः सर्वोत्तमः नारायणः अस्य प्रपञ्चस्य सृष्टेः प्रभुः। नान्यः कश्चित् तत्समः अस्ति। वेदादिषु सर्वत्र स विष्णुरेव अभिधीयते।[22]

---

15. Ibid. p. 79.
16. Ibid. p. 160.
17. छा. भा., p. 39.
18. तन्व. p. 1.
19. "मयाध्यक्षेण प्रकृतिः सूयते स चराचरम्॥" गीता., IX, 10.
20. छा., VI, ii, 1.
21. छा. भा., p. 39.
22. "स्वतन्त्रस्य पूर्णगुणत्वनियमात्" (न्या–नि–p. 4.)
"वेदैश्च सर्वैरहमेव वेद्यः"। गीता., XV, 15.

सर्वज्ञस्यसर्वशक्तियुतस्य विष्णोरेव जगतः कारणत्वं युज्यते । "सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः"[23] एव खल्वध्यात्मविदां दर्शनम् । क्रियाज्ञाने प्रति कारकान्तराप्रयोज्यत्वादिलक्षणं कर्तृत्वं भोक्तृत्वं परमेश्वरायत्तं आत्मनि स्वतो विद्यत एव । क्रियावेशादिरूपाया विक्रियाया विनाशाद्यहेतुत्वस्य वक्ष्यमाणत्वात् । तस्यापरायत्तत्वावभासोऽविद्यानिमित्तको भ्रमः । अविद्यादिकं च स्वरूपेण आत्मसंबन्धित्वेन च सदेव एवं बुद्धीन्द्रियशरीरविषयाः स्वरूपसन्त एव परमेश्वरवशा अप्यविद्यावशादात्मीयतयाऽध्यवस्यन्ते ।[24] नित्यानां चेतनाचेतनानामस्वतन्त्राणां सर्वेषामपि सद्रूपं तत्त्वं स्वतन्त्रमेव । स्वरूपप्रमिति-प्रवृत्तिलक्षणसत्तात्रैविध्येपरानपेक्षं स्वतन्त्रम् । परापेक्षमस्वतन्त्रम् ।[25] भगवतो नारायणस्यैव सर्वत्र स्वातन्त्र्यमिति विज्ञायते । सर्वत्राखिलचिच्छक्तिः स्वतन्त्रोऽशेषदर्शनः । नित्या तादृशचिच्चेत्या यन्तेष्टो नो रमापतिः[26] इति । स्वतन्त्रास्वतन्त्रभेदेन तत्त्वद्वैविध्यमुच्यते । प्रत्यक्षाविरुद्धत्वात् तत्त्वं नास्तीति न वक्तुं शक्यते । घटः सन् पटः सन् इति सर्वत्र सत्त्वमेवोपलभ्यते । नित्यानामपि जीवजडानामपि नियामकत्वेन नारायणस्य सच्छक्तिः । "तथा तं पुरुषं विश्वमाख्यास्यामि गुणाधिकम्"[27] "परस्य ब्रह्मणो यन्नामेन्द्रादिकं तन्महार्थ-त्वात् महत् । महद्धि तत्परं ब्रह्म अशेषगुणपूर्त्तेः" । शक्तयः सर्वभावानामचिन्त्य-ज्ञानगोचराः । यतो यतो ब्रह्मणस्तास्तु सर्गाद्या भावशक्तयः[28] इत्यादि-वचनात् सर्वज्ञत्वादिविशिष्टं ब्रह्मैव न निर्गुणम् । "निर्विशेषशब्दात् वै ब्रह्मेति हरिरुच्यते ।" सर्ववेदान्तवाक्यः सगुणं ब्रह्म अभिधीयते । "सत्यं ज्ञान-मनन्तं ब्रह्म"[29] "विज्ञानमानन्दं ब्रह्म" ।[30] "यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः" तस्मादेतद् ब्रह्म नामरूपमन्नं च जायते"[31] यस्मात्क्षरं पुरुषमतीतोऽति-

---

23. छा., IV, viii, 4.
24. *See.* न्यायसुधा., pp. 355–57.
25. तत्वसं. टीका.. p. 51.
26. तत्व p. 66.
27. छा. भा., p. 48.
28. वि. पु., I, iii, 2.
29. तै., II, i, 1.
30. बृ., III, v.
31. मु., I, i, 9.

क्रम्य स्थितः । अक्षरादपि पुरुषादुत्कृष्टतमः, सर्वेभ्यः पाप्मभ्यः उदित्वात्[32] । तथा च श्रुतिः—"उदिति नाम स (एव) एष सर्वेभ्यः पाप्मभ्यः उदितः"[33] अतो हेतोरस्मिल्लोके वेदे च पुरुषोत्तम इति प्रथितः तस्मादहं सर्वलोकप्रसिद्धः इत्यर्थः । तथाचोक्तं भगवता—"मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय । मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव ।"[34] "अहमेव परतरः मत्तोऽन्यत्परतरं न किञ्चिदस्ति ।"[35]

"इन्द्रियेभ्यः पराह्यर्थाः अर्थेभ्यश्च परं मनः ।
मनसस्तु परा बुद्धिः बुद्धेरात्मा महान् परः" ।।[36]
"महतः परमव्यक्तमव्यक्तात्पुरुषः परः ।
पुरुषान्न परं किञ्चित् सा काष्ठा परा गतिः ।।"[37]

इत्यादिश्रुत्यादिना भगवद्वचनाच्च विष्णोः पुरुषोत्तमत्वं[38] स्वतन्त्रत्वं च अभिहितम् । तथा च अद्भुतत्वादनिर्वाच्यं सद्रूपं ब्रह्मैव आसीत् । "नास्ति नारायणसमं न भूतं न भविष्यति—एतेन सत्यवाक्येन सर्वार्थान् साधयाम्यहम् । (भारते) इति स्वतन्त्रो भगवान् विष्णुः जगतः पूर्वमपि सद्रूपः इति सिध्यति ।। तत्तन्त्रत्वादैतदात्म्यम् । सर्वमेतद्ब्रह्मेत्युच्यते तदधीनसत्ताप्रतीतिमत्वात्, नतु स्वरूपत्वात् । उक्तं हि पाद्मे—त्वदधीनं यतः सर्वमतः सर्वो भवानिति । वदन्ति मुनयः सर्वे न तु सर्वस्वरूपतः ।।" इति । तथाचोक्तम्

दिव्यो ह्यमूर्तः पुरुषः स बाह्याभ्यन्तरो ह्यजः ।
अप्राणो ह्यमनाः शुभ्रो ह्यक्षरात्परतः परः .[39]

---

32. "पराऽस्य शक्तिर्विविधैव श्रूयते" श्वे–VI, 8.
"सत्यकामः सत्यसङ्कल्पः" छा–III, vi, 5.

33. छा., I, vi, 7.

34. गीता., VII, 7.

35. गी., भा, VII, 7.

36 क. III, 10.

37. क., III, 11.

38. परमात्मा च सर्वेषामाधारः परमेश्वरः ।
विष्णुर्नाम स वेदेषु वेदान्तेषु च गीयते ।" वि. पु. VI, iv, 39.

39. मु., II, i, 2.

'एतावानस्य महिमा अतो ज्यायांश्च पूरुषः'[40] "यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा[41]।

पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ।। (ई; शान्तिपाठः)

पुरुषोत्तमो नारायणः[42] एक एव ।

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्[43] ॥
यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः[44] ॥ इति

तथा च विष्णोः मूलं तथा अवतारस्वरूपं च पूर्णात्मनैव वर्त्तते । पूर्णरूपात् संख्यामात्रेण "उदच्यते" उद्रिच्यते एकमेव बहुसंख्याकं भवति । स्वस्य पूर्णस्य पूर्णमिदं अवतारस्वरूपमादाय तन्मूलरूपमेव अवशिष्यते । स्वस्यैव अवतार-रूपस्य निर्दोषस्य मूलरूपे अप्ययश्च प्रतिपाद्यतो "लोकवत्तु लीलाकैवल्यम् ।"[45] "ब्रह्म वा इदमग्र आसीत्"[46] । "स कारणं करणाधिपाधिपो न तस्य कश्चिज्जनिता न चाधिपः[47] । पतिं विश्वस्यात्मेश्वरं शाश्वतं शिवमच्युतम् । (ना. XIII, 9.) इत्यादिवचनैः विष्णुरेव सच्छब्दवाच्यो भवति ।

सत् असत्—

स्वाधीनं तत्त्वं सत् ।
पराधीनं तत्त्वम् असत् ।

वस्तु स्वतन्त्रमु दृष्टमस्वतन्त्रमवस्तु च ।
स्वाधीनं सदिति प्रोक्तं पराधीनमसत् स्मृतम् ॥

स्वरूपप्रवृत्तमिति प्रवृत्तिलक्षणसत्तात्रैविध्ये परानपेक्षं स्वतन्त्रं तत्त्वं सर्वसद्गुणाश्रयं दोषरहितं ब्रह्मैव सत् । भगवान् विष्णुरेव ब्रह्मशब्दवाच्यो भवति । विष्णुभिन्नं सर्वम् अस्वतन्त्रम् असत् ।

---

40. ऋ. वे., X, 90, 3.
41. Ibid. X, 82, 3.
42. छा. भा., p. 9.
43. गीता., IV, 7.
44. गीता., XV, 18.
45. ब्र. सू., II, i, 33.
46. बृ., I, IV, 10.
47. श्वे., VI, 9.

"सत्त्वं स्वातन्त्र्यमुद्दिष्टं तच्च कृष्णे न चापरे।
अस्वातन्त्र्यात्तदन्येषामसत्त्वं विद्धि इति...... ॥"

"स्वेच्छानुसारितामेव स्वातन्त्र्यं हि विदो विदुः"। "चेतनत्वं स्वतन्त्रं स्यात् सचैको विष्णुरेव तु"। बन्धो मोक्षः सुखं दुखं आवृत्तिर्ज्योतिरेव च। विष्णुनास्य समस्तस्य समासव्यासयोगतः ॥[48] निखिलमपि जगत् विष्णवधीनमेव। सृष्टिस्थितिबन्धमोक्षादिकं सुखदुःखबाह्यतमःप्रकाशादिकं वासुदेवाधीनमेवेति सर्ववेदवेदान्तेभ्यो विज्ञायते। "यो नः पिता जनिता।"[49] 'नासदासीन्नो सदासीत्तदानीं नासीद्रजो नो व्योमा परो यद्' [50] इति मन्त्रे सदसद्भिन्नं मूर्तामूर्तभिन्नं ब्रह्मैव परत्वेन अभिधीयते।

मूर्तं सदिति प्रोक्तममूर्तमसदुच्यते।
मूर्तामूर्तेतरद् ब्रह्म न सन्नासदुच्यते इति पैङ्गि श्रुतिः।

अत्र प्रामाणिकानां सरणिः द्रष्टव्या—अद्भुतत्वादनिर्वाच्यं परं ब्रह्मैकमेव आसीत्। "आनीदवातं स्वधया तदेकम्"[51] इत्येवं निरपेक्षतया एकत्व विष्णोरेव उच्यते। पारमार्थिकसत्वमेव स्वातन्त्र्यमित्युच्यते। विष्णोः स्वातन्त्र्यबीजम् ऋग्वेदे एव स्पष्टमभिधीयते। यदद्वैते नामोच्यते तत् 'परमार्थतः भगवदपेक्षयेत्यर्थः'।

पारमार्थिकसत्यत्वं स्वातन्त्र्यमभिधीयते।
तद्विष्णोरेव नान्यस्य तदन्येषां यदस्तिता ॥

"तस्म द्धान्यन्न परः किञ्चनास"[52] इति मन्त्रेण इतरापेक्षया परत्वमेव अभिधीयते। तथा च विष्णोः परत्वाभिधनेन इतरेषां जीवजडानामपि पराधीनसत्तात्वेन सत्यत्वं सूचितं भवति[53]। "नित्यो नित्यानां चेतनश्चेतनानाम्"।[54]"सत्यस्य सत्यम्"।[55]"मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जय। मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव"[56] ॥ "तम आसीदिति" इति मन्त्रेण

48. तत्वसं., p. 76.
49. ऋ. वे., X, 82, 3.
50. ऋ. वे., X, 129.
51. ऋ. वे., X, 129, 2.
52. ऋ. वे., X, 129.
53. Ibid.भाष्यम्
54. क, V, 13.
55. बृ., II, i, 20.
56. गीता., VII, 7.

तु परतन्त्रतत्त्वस्यापि अवस्थितिरासीदिति उच्यते। 'सत्त्वाच्चावरस्य'[57] इति सूत्रेण च तादृशार्थसिद्धिरेव भवति। तथा च एकं स्वतन्त्रं तत्त्वं तथा परतन्त्रं च तत्त्वम् आसीत्।" यादृशं ब्रह्मण: सत्त्वं तादृशं स्याज्जगत्यपि"। अत्र ब्रह्मण: य: स्वभाव: स एव जगत इति नोच्यते। किन्तु यादृशेन सत्त्वेन मिथ्यात्व-प्रतिपक्षभूतेन सत्यशब्दावगतेन ब्रह्मणि मिथ्यात्वाभावसंप्रतिपत्ति:, तादृशेन तेन जगति तत्प्रत्यय इत्येवार्थ: युक्त:। तथा च—

सत्त्वं स्वातन्त्र्यमुद्दिष्टं तच्च कृष्णे नचापरे।
अस्वातन्त्र्यात्तदन्येषामसत्त्वं विद्धि...... ॥ इति सत्यम्

द्वैतदिशा स्वतन्त्रमेव परं तत्त्वं तत्तु परमात्मनि श्रीकृष्णे एव।

सर्वोत्कर्षे देवदेवस्य विष्णोर्महातात्पर्यं नैव चान्यत्र सत्यम्[57]
मुख्यं च सर्ववेदानां तात्पर्यं श्रीपते: परम्।
उत्कर्षे तु तदन्यत्र तात्पर्यं स्यादवान्तरम् इति महावराहे।[58]
युक्तं च विष्णो: सर्वोत्तमत्व एव महातात्पर्यं सर्वागमानाम्।[59]

तत्तु स्वरूपप्रमितिप्रवृत्तिलक्षणसत्तात्रैविध्ये परानपेक्षम्। तदेव तत्त्वं श्रुत्यादिभि: विज्ञायते। यथा—"ब्रह्म वा इदमेक एव अग्र आसीत्[60]।" आत्मा वा इदमेक एव अग्र आसीत्[61] सदेव सौम्येदमग्र आसीत्[62] इति। भगवताभिधीयते-

"मया ततमिद सर्वं जगदव्यक्तमूर्तिना।
मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थित:॥[63]

तथा च स्वाधीनं तत्त्वं तु ब्रह्मण एव, तदेव सत्॥

"न चाभेदे कश्चिदागम:। सन्ति च भेदे सर्वागमा:।[64] नासदासीदित्यादि मन्त्रे तु अनिर्वचनीयात्मकमायात्मकमायासमन्वितम् एकमेव कारण प्रपञ्चस्य तत्त्वमिति अद्वैतमते अङ्गीक्रियते। परन्तु नाद्वैते तात्पर्यं किन्तु भेदे एव सर्वागमानां तात्पर्यमिति द्वैतसिद्धान्त:। तथा च नासदासीदित्यादिना

---

57. ब्र. सू., II, i, 16.
58. वि. नि., p. 126.
59. वि. नि., p. 127.
60. बृ., I, iv, 10
61. ऐ., I, i.
62. छा., VI,ii,1.
63. गीता., IX, 4.
64. वि. नि., p. 163.

सदसद्भिन्नमनिर्वाच्यं नोच्यते, किन्तु मूर्तामूर्तभिन्नं ब्रह्मैव अभिधीयते[65]। यदि सदसद्भिन्नम् अनिर्वाच्यं मायापदेन उच्यमानं चेत् तच्च कुत्र वर्तते इति वक्तव्यम्। ब्रह्मणि वा जीवे वा? न तावद् आद्यः 'असङ्गो ह्ययं पुरुष'[66] इति असङ्गत्वेन श्रुत्या प्रतिपाद्यमानत्वेन अज्ञानस्य तत्र वृत्तित्वानुपपत्तेः। न द्वितीयः जीवस्य अज्ञानकल्पितत्वेन स्वकल्पिते भाविनि जीवे तदाश्रयत्वस्य असंभाव्यमानत्वात्। तदेवोक्तम्—

आश्रयत्वविषयत्वभागिनी
निर्विशेषचितिरेव केवला।
पूर्वसिद्धतमसोऽपि पश्चिमो
नाश्रयो भवति नापि गोचरः[67]॥ इति।

तथा च अज्ञानं कारणं न वेति अङ्गीक्रियते चेत् तस्य विषयत्वं नैव निरूपयितुं शक्यते। अज्ञानस्य विषयः जीवो वा ब्रह्म वा, तथाहि न तावत् आद्यः अज्ञानेन कल्पितस्य जीवस्य जीवभावकल्पनात् पूर्वं निर्विषयत्वात्। तथा अज्ञानस्य निर्विषयत्वापत्तिः। नापि द्वितीयः ब्रह्मणः स्वप्रकाशत्वेन नाज्ञान-विषयत्वं संभवति। तद्धर्माः अज्ञाताः इति चेत् तद्धर्माणामपि कल्पितत्वेन तद्विषयत्वायोगात्। एवम् अयं प्रश्नः दुरुद्धरो भवति। अतः मायापदेन अनिर्वाच्या अविद्या नैव गृह्यते। किन्तु ईश्वरेच्छा ईश्वरज्ञानं ईश्वरशक्तिः इत्यादिरूपः अर्थः स्वीक्रियते। अपि च यद्यपि लोके मायाविना परिकल्पितं वस्तुजातं स्वेन नैव दृश्यते तथाऽपि तु जगत्स्रष्टा परमेश्वरः सर्वं जगत् पश्यति। 'सर्वद्रष्टा' इत्यादि श्रुतिस्तत्र प्रमाणम्। ईश्वरस्य भ्रान्तिर्नास्ति, निर्दोषत्वात्। अपहतपाप्मत्वावेदकश्रुतिः प्रमाणम्। तथा च अनिर्वचनीयाविद्यापरिकल्पना-संभवात् विश्वं सत्यमित्यायातम्। "विश्वं सत्यम्"[68]। "यच्चिकेत सत्यमित्[69]।" "ध्रुवा द्यौर्ध्रुवा पृथिवी"।[70] प्रथान्वस्य महतो महानि सत्या

---

65. 'मूर्तामूर्तेतरत् ब्रह्म न सत् नासदुच्यते' इति पैङ्गि श्रुतिः तत्व., p. 6
66. बृ., IV, iii, 15-16.
67. सं. शा., I, 319.
68. ऋ. वे., II, xxiv, 12.
69. ऋ. वे., XXXXXIV, 6.
70. ऋ. वे., X, 173, 4.

सत्यस्य करणानि'[71] इत्यादिश्रुत्या विश्वसत्यत्वमेव अवगम्यते। प्रपञ्चस्य भ्रान्तिकल्पितत्वेऽपि सत्यवस्तुद्वयापत्तिः स्यात्। लोके अधिष्ठानं तत्सदृशम् इति सत्यवस्तुद्वयं विना न भ्रान्तिः संभवति। तथा च शुक्तिरजतस्थले अधिष्ठानं शुक्तिः सत्या, न आविद्यकी न वा प्रातिभासिकी।

आपणस्थरजतं पूर्ववत् सत्यम्, तत्सत्वेन तत्स्मरणेन च शुक्तिकायां रजतमिति भ्रान्तिः। तथैव प्रकृते प्रपञ्चस्य भ्रान्तिकल्पितत्वे अधिष्ठानस्य अधिष्ठानभूतसदृशप्रपञ्चस्य च अङ्गीकारात् सत्यवस्तुद्वयापत्तिः स्यात्। तथा च पिण्याकयाचनार्थं गतस्य खारीतैलप्रदानप्रतिज्ञावत् अधिकापत्तिः यथा तथैव विश्वद्वयापत्तिः। तथात्वे प्रपञ्चस्य मिथ्यात्वकल्पनम् अयुक्तम्। किन्तु श्रीमध्वाचार्यदिशा प्रपञ्चः सत्यएव विमतं सत्यं अर्थक्रियाकारित्वात् घटादिवत्। तथा च अद्वैताभिमतम् अनिर्वचनीयमज्ञानं न जगत्कारणं भवितुमर्हति। अपि तु "विश्वं सत्यम्" इत्यादि श्रुत्या भेदो अस्ति वा नास्ति वा इति विकल्पस्य अवकाश एव नास्ति,[72] सर्वथा प्रपञ्चस्य सत्यत्वात्, प्रत्यक्षेण च अनुभूयमानत्वात्। अपि च भावाऽभावविलक्षणम् अनिर्वचनीयम् अज्ञानं नैव प्रत्यक्षतोऽनुमानेन वा गृहीतुं शक्यते, तस्य शशविषाणवत् अप्रसिद्धत्वात्। अनिर्वचनीयस्य सर्वत्राप्रसिद्धत्वादेव। शशविषाणं गोविषाणं वोच्यत इतिवत्। नचानिर्वचनीये किञ्चिन्मानम्। भिथ्याशब्दोऽनिर्वचनीयं वदतीत्यत्र च। अनुमानस्याप्रसिद्धविशेषणः पक्षः[73]।

नासदासीदिति मन्त्रेण अनिर्वचनीयं अङ्गीक्रियते इति चेदुच्येत, तदा "आनीदवातं स्वधया तदेकम्" इति तदानीं परिशिष्टत्वात् ब्रह्मणोऽपि अनिर्वचनीयत्वं प्रसज्येत। तन्न युक्तम्। तथा च अनिर्वचनीयमज्ञानं जगत्कारणम् इति मतं न सम्यक्। तथा च श्रुत्या प्रत्यक्षेण अनुमानेन च जगत् सत्यमेव भवति[74]।

विश्वं सत्यं वशे विष्णोः नित्यमेव प्रवाहतः।
न क्वाप्यनीदृशं विश्वं तत्तत्कालानुसारतः[75]॥

---

71. ऋ॰ वे., II, xiv, 1.
72. ॰तत्व., p. 6
73. "न च भेदे विकल्पो युज्यते"। तत्व., p. 6.
74. bid.
75. bid.

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम्

त आसुराः स्वयं नष्टाः जगतः क्षयकारिण इत्यादि व्यासस्मृतौ ।[76]

जगन्मिथ्यात्वकथनं सर्वथा असङ्गतं च भवति। तथा च ईश्वरापेक्षं जगत् सत्यमेव ॥

यत्र हि द्वैतमिव भवतीति इवशब्देन न द्वैताभावः प्रतिपाद्यते तत्र द्वैतस्य अस्वातन्त्र्यमभिप्रेत्य द्वैतमिवेत्युक्तम्। धर्मिप्रतीतिरेव भेदप्रत्ययस्य कारणम्। घटादिवस्तुनः स्वरूपं यत्कम्बुग्रीवादिकं तत्स्वरूपात्मक एव भेदो नान्य इति श्रीमाध्वसिद्धान्तः अन्योन्याभावस्य वस्तुस्वरूपात्मकत्वाभ्युपगमात्। तथा च पदार्थस्य स्वरूपम् एव भेदः। तथाहि—प्रत्यक्षं तावदिदमस्माद्भिन्नमिति नीलपीतादेः भेदमध्यक्षयति[77]। प्रत्यक्षसिद्धः धर्मिप्रतीतिभेदस्तु उपलभ्यते। सिद्धस्यैव भेदस्य श्रुत्यापि विज्ञाप्यते।

सत्यमेनमनु विश्वे मदन्ति। रतिं देवस्य गृणतो मघोनः सत्यः सोऽस्य महिमा गृणे, शवो यज्ञेषु विप्रराज्ये। सत्य आत्मा, सत्यो जीवः, सत्यं भिदा। इति (मोक्षप्रतिपादकश्रुतिः)[78] विष्णुना हेतुभूतेन विश्वे सर्वे प्राणिनः हृष्यन्ति। तथाविष्णोः महिमा सर्वोत्तमस्वरूपः सत्यः। अस्यां श्रुतौ मोक्षानन्दः प्रतिपादितः।

जीवपरैक्यं न शास्त्रार्थः। तथा सति शास्त्रमनर्थकं स्यात्। तथाहि—श्रुतितन्मीमांसाशास्त्रमनारंभणीयम्, अन्यथाप्रतिपादकत्वात्, यदित्थं तत्तथा यथा संप्रतिपन्नम्, ब्रह्मात्मैक्यस्य मुख्यतया शास्त्रप्रतिपाद्यत्वे तस्य ब्रह्मभिन्नत्वे मिथ्यात्वेन शास्त्रस्यायथार्थप्रतिपादकत्वं सत्यत्वेऽद्वैतहानिरिति स्वसिद्धान्तविरोधः। ब्रह्मात्मैक्यस्य ब्रह्मस्वरूपानतिरेके च तस्य स्वप्रकाशत्वेन नित्यसिद्धत्वच्छास्त्रं सिद्धसाधनम्। न च स्वप्रकाशतयात्मस्वरूपस्य सिद्धत्वेऽप्यद्वैतादिविशेषाकारेणानधिगतत्वान्न शास्त्रं सिद्धसाधनमिति वाच्यम्, ब्रह्मणो निर्विशेषत्वाभ्युपगमात्। तथा चाधिगतार्थविषयज्ञानजनकं शास्त्रमिति न तस्य प्रामाण्यम्। अनधिगतार्थज्ञापकस्यैव प्रामाण्यात्। न च शास्त्रमावरणभूतज्ञाननिवर्त्तकं न तु साक्षादद्वैतप्रतिपादकमिति वाच्यम्,

76. स. द. सं., p. 129. 78. गीता., XIV, 2

77. Ibid. p. 139.

अज्ञानस्यावरणत्वासंभवात्। नाज्ञानं ब्रह्मस्वरूपावरणं तस्य स्वप्रकाशत्वेन नित्यसिद्धत्वात्। नापि ब्रह्मगतविशेषावरणं तत् ब्रह्मणो निर्विशेषत्वात्। एवं व्यापकाभावान्न व्याप्यमावरणमज्ञानम्। अज्ञानासंभवेन अज्ञातो विषयोऽपि नास्ति। मोक्षस्य स्वरूपत्वात् सिद्धत्वेन प्रयोजनत्वमपि न संभवति। एवमाधिकार्याद्यभावेन शास्त्रमनारंभणीयं स्यात्। द्वैतवादे च विष्णोर्भगवतः सर्वोत्तमत्वप्रतिपादनमेव शास्त्रेण क्रियते इति न कश्चिद्दोषः।

आत्मा परमात्मा सत्यः। जीवः सत्यः। तयोर्भेदश्च सत्यः। जगतः जडस्वरूपस्य सत्यत्वं पूर्वमेव प्रतिपादितम्। तथा च यथा परमात्मनो जीवो भिन्नस्तथा जगदपि तस्माद्भिन्नम्। जीवानामपि मिथो भेदः पारमार्थिकः। तथा द्वैतमते पञ्चभेदाः पारमार्थिकाः स्वीक्रियन्ते।

तथाहि—

(1) जीवेश्वरः भेदः।

(2) जडेश्वर भेदः।

(3) जीवजडभेदः।

(4) जीवजीवभेदः।

(5) जडजडभेदः। इति। एतदेव भेदपञ्चकमित्युच्यते॥

नहि जीवब्रह्मणोरेकत्वमुपपद्यते विरुद्धधर्माश्रयत्वात्। तथाहि जीवपरौ भिन्नौ विरुद्धधर्माश्रयत्वात् दहनतुहिनवत्। औष्ण्यशैत्याश्रययोः दहनतुहिनयोः भेदः सर्वलोकानुभवसिद्धः। तद्वत् सर्वज्ञत्वापरिच्छिन्नत्वसर्वशक्तत्वाद्याश्रयस्य ब्रह्मणः; अल्पज्ञत्वपरिच्छिन्नत्वाद्याश्रयस्य जीवस्य च भेद एवाभ्युपगन्तव्यः। तथा च जीवानामपि मिथो भेदोऽप्यनुभवानुरोधादङ्गीकार्यः। न च विरुद्धधर्माश्रयत्वप्रतीतिरौपाधिकीति वाच्यम् उपाधेः स्वतो विद्यमानस्यैव भेदस्य ज्ञापकत्वात्। न ह्युपाधिरविद्यमानं भेदमुत्पादयितुमलम्। किञ्चोपाधिभेदात्परमात्मनः सर्वज्ञस्याज्ञत्वमिति वक्तुं न शक्यते। अन्योन्याश्रयाच्चक्रकापत्तेश्च। अतः हिताहितप्राप्तिपरिहारपूर्वकव्यापारवत्त्वात् परदेहस्य सात्मत्वानुमाने स्वात्मनः तस्माद्भेदानुभवेन च जीवेशयोः च जीवानां मिथो भेद एव समीचीनः। एवं द्वैतिभिः भेदपञ्चकस्य सत्यत्वमाम्नायते। मोक्षावस्थायामपि जीवः परमेश्वराद्भिन्न एव तिष्ठति। तथा चोक्तम्—

मुक्तौ पृथक् स्थितान्येव तदन्येषामदर्शनम् ।
अप्ययोऽयं समुद्दिष्टो न स्वरूपैकता क्वचित् । इति (नारायणीय-श्रुतिः)
अहमित्येव यो वेद्यः स जीव इति कीर्तितः ॥ इति (परमश्रुतिः)

गीतायामपि भेदः उच्यते—

इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च [78] ॥

इदं सर्वोत्तमत्वेन सेव्यत्वेन च रूपेण जायमानं परमात्मज्ञानमुपाश्रित्य मत्सादृश्यं प्राप्ताः मुक्ताः जीवाः सर्गेऽपि देवादिषु उत्पद्यमानेष्वपि पुनरावृत्ति-रहिताःभवन्ति । तथा प्रलयेऽपि दुःखानि नानुभवन्ति । इयं भगवदुक्तिः मोक्षानन्तरमपि भेदमेव वक्ति । 'जगद्व्यापारवर्जम्'[79] इत्यनेन सूत्रेणापि जगद्व्यापारवर्जं सर्वान् कामान् मुक्तः आप्नोतीति भेदः । जगद्व्यापारस्तु परमेश्वरस्यैव । मोक्षे जीवः न दुःखभाक् । ईश्वरवत्सः विविधसुखानि भुङ्क्ते, किन्तु लक्ष्मीश्रीवत्सप्राप्तिस्तस्य न भवति । सर्वेश्वरो हरिः सेव्यः, जीवः सेवकः । मोक्षेपि सः ईश्वरपराधोन एव न स्वतन्त्रः । तथा अनादिनित्या प्रकृतिरपि सत्यभूता न स्वतन्त्रा । तथा च पराधीनसत्तयैव तयोः सत्यत्वेऽपि स्वातन्त्र्याभावात् असदिति उच्यते । सर्वतन्त्रस्वतन्त्रो भगवान् विष्णुः परमात्मैक एव सच्छब्देनाभिधीयते । तथा च स्वरूपप्रमितिप्रवृत्तिसत्ता-त्रैविध्ये परानपेक्षं सर्वज्ञं सर्वज्ञशक्तिसमन्वितं सच्चिदानन्दस्वरूपं परं ब्रह्मैव "सत्" परमं सत्यं तदधीनत्वात् जीवजडानां "असत्" इति भेदोऽपि युक्तः । सत्यपदस्य पारमार्थिकत्वविवक्षायां तु जीवजडादिजगदपि सत् सत्यमेव । माध्वसिद्धान्तसंग्रहः एवं वर्ण्यते—

श्रीमन्माध्वमते हरिः परतरः सत्यं जगत्तत्वतो
भिन्ना जीवगणा हरेरनुचराः नीचोच्चभावं गताः ।
मुक्तिर्नैजसुखानुभूतिरमला भक्तिश्च तत्साधनम्
ह्यक्षादित्रितयं प्रमाणमखिलाम्नायैकवेद्यो हरिः ॥ इति द्वैते सत्यदर्शनम् ॥

---

78. गीता., XIV, 2. 79. ब्र. सू. भा., IV, iv, 27

उपसंहारः

'ब्रह्म सत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः,' इति वेदान्ताचार्याणां सत्यदर्शनम्। ब्रह्म सत्यमिति द्वैतविशिष्टाद्वैताद्वैताचार्याणां श्रीमध्वश्रीरामानुज-श्रीशङ्कराचार्याणां मतम्। जीवस्य जडस्य कारणात्मकप्रपञ्चस्य च ब्रह्मणः शरीरभावेन सत्यत्वमभ्युपगच्छन्ति श्रीरामानुजाचार्याः। तत्तु विशिष्टरूपेण ऐकात्म्यं परं पश्यन्ति ते।

जगत् सत्यम्

भौतिकदार्शनिकानामिव वेदान्तिनामपि जगत् सत्यमेव। किन्तु श्रीमध्वाचार्यैः ईश्वरस्यैव स्वातन्त्र्यं जीवजडयोः पराधीनत्वात् स्वतन्त्र-सत्ताकत्वं नास्तीति अभ्युपगम्यते। तथाहि जीवस्य जडस्य जगतः अस्वातन्त्र्य-मुत पराधीनसत्ताकत्वमेव अभ्युपगच्छन्ति। अद्वैते तु व्यावहारिकस्य जगतः मिथ्यात्वमेव। मिथ्यात्वं तु अर्थक्रियाकारित्वम्। अर्थक्रियाकारित्वं नाम सप्रयोजनत्वम्। तथाहि जगत् सप्रयोजनमिति अद्वैतिनां द्वैतिनामपि मतम्। मध्वाचार्याणामपि, द्वैतं सप्रयोजनं सत्यमिति निर्धार्य जनानाम् अभ्युदयनिश्रेय-सार्थम् ईश्वरार्पणबुद्ध्या कर्म कर्त्तव्यमिति आदिश्यते। तात्त्विकतया पर्यालोच्यते तर्हि, जगत् व्यवहारकाले, व्यावहारिकं सत्यमिति पूर्णतया अभ्युपगम्यते शङ्कराचार्यैरपि। तथा सप्रयोजनत्वं प्रपञ्चस्य वेदान्ताचार्यैः अङ्गीक्रियते इति न वेदान्तानुयायिनां कलहस्य अवकाशः।

सगुणं ब्रह्म सत्यम्

सगुणं ब्रह्म तु मायावच्छिन्नं चैतन्यं ईश्वरः। मायासमन्वितं चैतन्यं सगुणं सर्वज्ञं सर्वशक्तिसमन्वितं सृष्टिस्थितिलयकारणं भक्तानां दुःखनिवारण-पूर्वकम् आनन्दसन्दायकं मोक्षकारणमिति च वेदान्ताचार्यैः ईश्वरस्य सत्यं समानमेव उपदिश्यते लोककल्याणार्थम्।

परमकारणं सत्यम्

कार्यस्य प्रपञ्चस्य अनित्यत्वेपि परमकारणस्य सत्यत्वमेव अङ्गीकुर्वन्ति। तथाहि ईश्वरः सर्वभूतानां हृद्देशे तिष्ठतीति त्यागपूर्वकं जनसेवनं, 'दरिद्र-नारायणसेवनम्' एव ईश्वरसेवा इति "दरिद्रदेवो भव" "मूर्ख देवो भव" इति वचनद्वयं, "मातृदेवो भव" "पितृदेवो भव" "आचार्यदेवो भव" इति आर्ष-

वचनैः साकं आधुनिकैः वेदान्ततत्त्वज्ञैः सत्यदर्शिभिरङ्गीक्रियते । श्रीरामकृष्ण-श्रीविवेकानन्दश्रीनारायणश्रीचट्टम्पिस्वामिश्रीरमणमहर्षिप्रभृतिभिः कर्मयोगानुष्ठानपूर्विका भक्तिरपि मोक्षकारणं भवतीति आदिश्यते । तथाहि श्रीशङ्करेण तु ईश्वरस्य सत्यत्वं, ईश्वरप्रसादस्य अभ्युदयनिश्रेयसकारणत्वं च युक्त्या, वेदादिप्रमाणैः अनुभवेन च निर्णीयते । किन्तु परमसत्यं एकमेव तत्, सत्यस्य ईश्वरस्य, जीवस्य प्रपञ्चस्य च सत्यं चैतन्यं नित्यशुद्धमुक्तनिरतिशयपरमानन्दस्वरूपं ब्रह्मात्मस्वरूपम् एकमेवाद्वितीयमिति निर्धारयन्ति । तथा आधुनिकभौतिकशास्त्रज्ञैरपि जडस्य जगतः अधिष्ठानं चैतन्यमेवेति अभ्युपगम्यते ।

भारतीयदार्शनिकानां सत्यदर्शनम्

चतुर्णां भूतानां सन्निवेशपरिणामातिशयेन जीवस्य उत्पत्तिस्तथा 'शरीरपात एव मोक्ष' इति वदतां प्रत्यक्षैकप्रमाणवादिनां भौतिकाचार्याणामपि समत्वाधिष्ठितभौतिकवादस्यापि सत्यदर्शनं भौतिकजीविते सङ्कुचितजातिमतादिनिरासाय सप्रयोजनं इति वेदान्ततत्त्वदर्शिभिरङ्गीक्रियते । तथैव सांख्यदर्शने मूलप्रकृतिकार्यत्वात् प्रपञ्चस्य, तथा ज्ञानैकाकारस्य पुरुषस्य बहुत्वाभ्युपगमेऽपि प्रायेण अद्वैतसत्यपरिस्फुरणं भवति, यतः सत्वरजस्तमोगुणान्वितत्वात् प्रकृतेः प्रायेण अद्वैताभिमतमायाकल्पनायाः परं प्रद्योतकं भवति । किन्तु क्षणिकविज्ञानवादिभिः बौद्धानुयायिभिस्तु विज्ञाननाशेऽपि तदनुविद्धसंस्कारस्तु अनुस्यूतत्वेन परं एकात्मकं सत्यस्वरूपदर्शनं अभ्युपगम्यते किल? किन्तु संवृतिसत्यपारमार्थिसत्यदर्शनं श्रीबुद्धदर्शनस्य, प्रायेण वेदवेदान्तशास्त्राणां तथा योगिभिः तत्वदर्शिभिरनुभूयमानम् एकमद्वयं सत्यदर्शनं श्रीशङ्करस्य अद्वैतपरमसत्यसाधने प्रयोजकमिति विदुषां मतं जात्यादिभेदनिरासपूर्वकं साधु भवति । ।

यदि श्रीबुद्धः जातिवादी स्यात् तर्हि श्रीशङ्करोऽपि जातिवादी स्यात् श्रीशङ्करस्य; 'ज्ञानी चण्डालोऽपि परमाचार्य' इति दर्शनं भारतदेशे सत्यदर्शिनां जातिचिन्तानिरासार्थं मतभेदनिरासार्थमेव प्रचोदकं भवति । कर्मणः परं प्राधान्यं स्वर्गादिसिद्धये पूर्वमीमांसकैः अभ्युपगम्यते । किन्तु नेश्वरपरिग्रहः इति वैदिकसंस्कारप्रचारकाणां सत्यदर्शनं तु भारतदेशे श्रीबुद्धस्य कालपर्यन्तं जातिमतादिपरिकल्पितदोषजन्यं दुष्टं फलं प्रायेण जनैः अनुभूयमानं, न पारमार्थिकसत्यदर्शने उपकारकमासीदिति विदुषां मतम् । किन्त मीमांसकानां

शब्दब्रह्मभावना तु अद्वैतसत्यदर्शने परं सहायकमासीत्। ईश्वरादिपदार्थसत्यदर्शनेन तु मोक्षप्राप्तिरिति न्यायवैशेषिकाचार्याणां मतम्। प्रायेण भौतिकपदार्थानां च विश्लेषणेन तु जगतः उपादानकारणं परमाणुरिति, तथैव ईश्वरः निमित्तकारणञ्च दर्शयित्वा सत्यपन्थाः कीदृश इति निरीक्षयन्ति। यास्तिभिस्तु क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषः ईश्वरः मुख्यः मोक्षदः इति प्रकृतिपुरुषादिसांख्याभिमततत्वेन साकं परिदृश्यते सत्यम्। तथा चार्वाकादिभारतीयदार्शनिका: प्रपञ्चस्य पारमार्थिकसत्यान्वेषणे कुतुकिनः अद्वैतपरमसत्यपरिस्फुरणं च प्रायेण ज्ञातम् इति जनानां प्रचोदकं भवति।

अद्वैतदर्शनं प्रायोगिकम्

तथाहि भारतीयदार्शनिकाः न्यायवैशेषिकसांख्ययोगजैनबौद्धचार्वाकाद्याचार्याः प्रपञ्चस्य आत्मनः सत्यस्वरूपम् एव अन्विष्य स्वकीयसत्यदर्शनं बहुधा वर्णयन्ति लोककल्याणाय। आचार्याः शङ्कराचार्यास्तु भारतीयदार्शनिकानां परमाचार्याः मायावादेन अद्वैतसत्यम् आत्मरूपं अभ्युपगच्छन्ति। मायावादेन जगत् सत्यमिति अभ्युपगम्यते। किन्तु व्यवहारकाले एव सत्यमिति निर्धार्य प्रपञ्चस्य अधिष्ठानं आनन्दस्वरूपं चैतन्यं परमसत्यमिति च निर्धारितम्। माया तु—

न सद्रूपा नासद्रूपा माया नैवोभयात्मिका।
सदसद्भ्यां अनिर्वाच्या मिथ्याभूता सनातनी॥ इति मायास्वरूपं

सद्भिन्नम् असद्भिन्नं सदसद्भिन्नम् अनिर्वचनीयं वर्णयन्ति। सुखदुखमोहात्मकस्य प्रपञ्चस्य कारणं सत्वरजस्तमोरूपा मूलप्रकृतिः मायेति सांख्यविशिष्टाद्वैतमतानुसारेण निर्धार्यते। किन्तु अनदी इयं माया तत्वज्ञानेन विनश्यति इति विशेषः। मायैव अज्ञानम्। अज्ञानं भावरूपं भवति। अद्वैतसिद्धिकारेण 'अनादित्वे सति भावरूपत्वे सति ज्ञाननिवर्त्यत्वं अज्ञानस्य लक्षणं' उपवर्णितम्।

तथाहि वेदान्तशास्त्रे जगत् सत्यमिति अङ्गीक्रियते। मिथ्यात्वं तु प्रपञ्चस्य, न अत्यन्तासत्यं बोधयति, किन्तु अर्थक्रियाकारित्वमेव द्वैतविशिष्टाद्वैताद्वैतवादिनां श्रीमध्वश्रीरामानुजश्रीशङ्कराचार्याणां मतम्। द्वैतिनां यद्यपि नाम स्वीयमतानुसारेण कलहः स्यात्, तथापि अद्वैतिनां कलहस्य कदाऽपि अवकाशो नास्ति ऐकात्म्यदर्शनात्। अध्यारोपापवादाभ्यां हि 'तत्त्वमसि'-प्रतिबोधितैकात्म्यदर्शनं प्रायोगिकमिति वेदान्तनिर्णयः॥

अज्ञानपरिकल्पितस्य जडस्य प्रपञ्चस्य पाञ्चभौतिकाख्यस्य शरीरस्य च विनाशित्वेऽपि, अखिलशरीरगतचैतन्यस्य सजातीयविजातीयस्वगतभेदो नास्तीति अद्वितीयं सत्यं लोककल्याणाय विजयते । मायावादेन प्रपञ्चस्य मिथ्यात्वपरिकल्पनेन भारतीयानां कर्मवैमुख्यम्, आलस्यं वा सञ्जातमिति केषाञ्चित् भौतिकवादिनां मतं न युक्तम् । यतो वा अद्वैतिभिस्तु सर्वथा कर्मयोगस्य चित्तशुद्धिद्वारा ज्ञानस्य दुःखनिवृत्तिपूर्वकं मोक्षकारणत्वम् अभ्युपगम्यते । अपि च ज्ञानिभिरपि लोकसंग्रहार्थं कर्म अनुष्ठीयते[1] । वेदान्ताचार्यैः सर्वैरपि एकस्य ईश्वरस्य, ईश्वरप्रसादस्य च प्रामाण्यमभ्युपगम्यते इति अद्वैतरहस्यम् अनुसृत्यैव श्रीशङ्करानुयायिभिः श्रीरामानुजश्रीमध्वाचार्यैः प्रपञ्चस्य सत्यत्वमभ्युपगम्य, चित्तवृत्तिनिरोधपुरस्सरं योगनिष्ठया सर्वथा परमेश्वरार्थस्य कर्मणः परमं प्राधान्यम् अनुविधीयते। तथा हि वेदान्तशास्त्रम् अनुसृत्य व्यावहारिकस्य प्रपञ्चस्य अभ्युदयनिश्रेयसहेतुत्वात् श्रीशङ्कराचार्यस्यैव मतमनुसृत्य भारतीयदार्शनिकैः शास्त्रविहितं कर्मैव "आत्मनो मोक्षार्थं जगद्धिताय" च अनुष्ठीयते । तथैव भौतिकवादिभिरपि प्रायेण त्यागपूर्वं कर्म वेदान्तदर्शनं ज्ञात्वा अज्ञात्वा वा अनुष्ठीयते । अपि च अद्वैतिभरपि द्वैतिभिरिव वेदवेदान्तशास्त्रप्रतिबोधितं कर्म अभ्युपगम्यते, सर्वत्रैकात्म्यदर्शनम् इति विशेषः । किन्तु व्यावहारिकस्य प्रपञ्चस्य नित्यसत्यत्वं नास्ति, पारमार्थिकस्य परमसत्यत्वात् । यतो वा "अहं ब्रह्मास्मि" तत्त्वमसीत्यादि महावाक्यप्रतिबोधिताखण्डाकारधिया अथवा तत्त्वज्ञानेन अज्ञानस्य— मायायाः तत्कार्यस्य च साकल्येन विनाशः मोक्षावस्थायां स्यात् ।।[2] अद्वैतदर्शनं तु भौतिकाध्यात्मिकवादसमन्वयेन लौकिकानामपि महदुपकारकं भवेदिति श्रीशङ्करानुयायिभिः लोके स्वजीवितेन प्रकाशितम् । 'एका जातिः', 'एकं मतं', 'एकः ईश्वरः' मानवानां, 'दरिद्रदेवोभव' इति च अद्वैतदर्शनं लोकस्य योगक्षेमाय विजयते ।

भौतिकशास्त्रस्य दोषमपनीय मानवजीवितं पूर्णं सफलं च कर्त्तुं, शक्तं वेदान्तदर्शनं, लोककल्याणाय आधुनिकयुगे न केवलं भारतदेशे, राष्ट्रान्तरेष्वपि जनैरङ्गीक्रियते ।।

1. लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि ।। गीता., III, 20; गी. भा., II, 47.

2. तत्त्वमस्यादिवाक्योत्थसम्यग्धीजन्ममात्रतः ।
अविद्या सहकार्येण नासीदस्ति भविष्यति ।। (वार्तिकम्)

ABBREVIATIONS

अनु. अनुव्याख्यानम्
अ. सि. अद्वैतसिद्धिः
ई. ईशावास्योपनिषत्
ऋ. वे. ऋग्वेदः
ऐ. ऐतरेयोपनिषत्
ऐ. भा. ऐतरेयोपनिषद्भाष्यम्
क. कठोपनिषत्
कर्म. कर्मनिर्णयः
के. केनोपनिषत्
कौ. कौषीतक्योपनिषत्
गीता. श्रीमद्भगवद्गीता
गी. भा. गीताभाष्यम्
चन्द्रिका. लघुचन्द्रिका
छा. छान्दोग्योपनिषद्भाष्यम्
छा. भा. छान्दोग्योपनिषत्
तत्व. तत्वसंख्यानम्
तत्व. सं. टीका. तत्वसंख्यानटीका
तेजो. तेजोपनिषत्
तै. तैत्तिरीयोपनिषत्
तै. भा. तैत्तिरीयोपनिषद्भाष्यम्
पञ्च. पञ्चदशी
प्र. प्रश्नोपनिषत्

बृ. बृहदारण्यकोपनिषत्
बृ. भा. बृहदारण्यकोपनिषद्भाष्यम्
बृ. वा. बृहदारण्यकवार्तिकम्
ब्र. सू. ब्रह्मसूत्रम्
ब्र. सू. भा. ब्रह्मसूत्रभाष्यम्
भज. गो. भजगोविन्दम्
भा. म. भामती
म. वा. सं. मध्ववार्तिकसंग्रहः
मा. माण्डूक्यकारिका
मा. उ. माण्डूक्योपनिषत्
मु. मुण्डकोपनिषत्
वि. त. विष्णुतत्वनिर्णयः
वि. पु. विष्णुपुराणम्
वे. प. वेदान्तपरिभाषा
वे. सं. वेदार्थसंग्रहम्
श्वे. श्वेताश्वतरोपनिषत्
श्री. भा. श्रीभाष्यम्
सि. बि. सिद्धान्तबिन्दुः
सि. ले. सं. सिद्धान्तलेशसंग्रहः
सां. तत्व. सांख्यतत्वकौमुदी
स. द. सं. सर्वदर्शनसंग्रहः
सं. शा. संक्षेपशारीरकम्

DARŚANA MĀLĀ

A GARLAND OF VISIONS OF VEDĀNTA

BY

SRI NĀRĀYAṆA GURU

CHAPTER ONE

Adhyāropadarśanam—Vision of Superimposition

आसीदग्रे ऽसदेवेदं भुवनं स्वप्नवत् पुनः ।
ससर्ज सर्वं संकल्पमात्रेण परमेश्वरः ।। १ ।।

1 In the beginning this world was non-existent. Then, at the time of creation, the Lord Supreme *(Parameśvara)* created everything by His mere willing, like the objects created in a state of dream.

वासनामयमेवादावासीदिदमथ प्रभुः ।
असृजन्मायया स्वस्य मायावीवाखिलं जगत् ।। २ ।।

2 Before creation, this world existed in the form of incipient memory factors *(Vāsanā)*. Then, magician-like, the Lord created the whole world with His power of *Māyā*.

प्रागुत्पत्तेरिदं स्वस्मिन् विलीनमथ वै स्वतः ।
बीजादङ्कुरवत् स्वस्य शक्तिरेवासृजत्स्वयम् ।। ३ ।।

3 This world was latent within the Lord Himself before creation. At the time of creation the whole world was originated by His power of *Māyā*, by itself, like the sprout from the seed.

शक्तिस्तु द्विविधा ज्ञेया तैजसी तामसीति च ।
सहवासोऽनयोर्नास्ति तेजस्तिमिरयोरिव ।। ४ ।।

4 The power of *Māyā* is of two kinds—*Taijasī* (bright) and *Tāmasī* (dark). Like light and darkness these two have no co-existence.

मनोमात्रमिदं चित्रमिवाग्रे सर्वमीदृशम् ।
प्रापयामास वैचित्र्यं भगवान् चित्रकारवत् ॥ ५ ॥

5 Before creation this world was merely the mind-stuff like a picture before execution. The Lord, like an artist, accomplished it with all its artistic variety.

आसीत् प्रकृतिरेवेदं यथादौ योगवैभवः ।
व्यतनोदथ योगीव सिद्धिजालं जगत्पतिः ॥ ६ ॥

6 In the beginning this world was in the form of nature *(Prakṛti)* like the psychic powers of yoga. At the time of creation the Lord mainfested His powers in the same way as a Yogi would exercise his psychic powers.

यदाऽत्मविद्यासंकोचस्तदाऽविद्या भयंकरम् ।
नामरूपात्मनाऽस्त्यर्थं विभातीह पिशाचवत् ॥ ७ ॥

7 When self-knowledge shrinks, nescience (*avidyā*) manifests itself in names and forms in the most terrifying way like a ghost.

भयंकरमिदं शून्यं वेतालनगरं यथा ।
तथैव विश्वमखिलं व्यकरोदद्भुतं विभुः ॥ ८ ॥

8 Like an infernal city this world is terrible and devoid of content. In the same manner the Lord made all this universe such a marvel.

अर्काद्यथाक्रमं विश्वं तथा नैवेदमात्मनः ।
सुप्तेरिव प्रादुरासीद्युगपत्स्वस्य वीक्षया ॥ ९ ॥

9 That this world originated from the sun in gradual succession, is not true. The whole world came into existence, at one stroke, from *Ātman* (Self) by its mere willing, as if from sleep.

धानादिव वटो यस्मात् प्रादुरासीदिदं जगत् ।
स ब्रह्मा स शिवो विष्णुः स परः सर्व एव सः ॥ १० ॥

10 Just as a huge banyan tree arises from a minute seed, the whole universe became manifested from the Lord. He is *Brahma*, He is *Viṣṇu*, He is *Śiva*. He is the Supreme Self, He is everything.

CHAPTER TWO

Apavāda Darśanam—Vision of Refutation

चैतन्यादागतं स्थूलसूक्ष्मात्मकमिदं जगत् ।
अस्ति चेत्सद्घनं सर्वं नास्ति चेदस्ति चिद्घनम् ।। १ ।।

1 If this world which has subtle and gross forms, and which has come out of living consciousness (the Lord), exists, then everything is existent. If it (this world) is said to be non-existent, it exists as consciousness.

अन्यन्न कारणात्कार्यमसदेतदतोऽखिलम् ।
असतः कथमुत्पत्तिरनुत्पन्नस्य को लयः ।। २ ।।

2 The whole world is non-existent, for, there is no existence of the effect apart from the cause (and the cause alone is real). How can there be the origin of the non-existent, or how can there be the dissolution of an un-originated thing?

यस्योत्पत्तिर्लयो नास्ति तत् परं ब्रह्म नेतरत् ।
उत्पत्तिश्च लयोऽस्तीति भ्रमत्यात्मनि मायया ।। ३ ।।

3 Anything that has neither origin nor dissolution is nothing but the supreme Brahman Himself. In confusion everyone superimposes origin and dissolution on *Ātman* owing to the power of Māyā.

कारणाव्यतिरिक्तत्वात् कार्यस्य कथमस्तिता ।
भवत्यतः कारणस्य कथमस्ति च नास्तिता ।। ४ ।।

4 How can an effect exist without the cause as the effect is non-different from the cause? And so how can the cause be non-existent?

कार्यत्वादसतोऽस्यास्ति कारणं नह्यतो जगत् ।
ब्रह्मैव तर्हि सदसदिति मुह्यति मन्दधीः ।। ५ ।।

5 The world is the effect which has no independent status. There is a cause for it with independent status. So the world is non-existent, only Brahman is sat. But the dull-minded person mistakes the Real (Brahman) for the unreal, asat, (world).

एकस्यैवास्ति सत्ता चेदन्यस्यासौ क्व विद्यते ।
सत्यास्त्यात्माश्रयो यद्यप्यसति स्यादसंभवः ।। ६ ।।

6 If one (the cause or the Absolute) alone has reality, how can there be reality to the other (i.e. to the effect). If existence of the one is said to be in that of the same, there is the defect of self-reliance (tautology). And if it is said that there is existence in the non-existent, there is the defect of contradiction (improbability)

विभज्यावयवं सर्वमेकैकं तत्र दृश्यते ।
चिन्मात्रमखिलं नान्यदिति मायाविदूरगम् ।। ७ ।।

7 When dissected part by part, the whole world will seem to be devoid of Māyā; it is nothing but the stuff of Absolute, pure-consciousness.

चिदेव नान्यदाभाति चितः परमतो नहि ।
यच्च नाभाति तदसद्यदसत्तन्न भाति च ।। ८ ।।

8 Knowledge alone shines everywhere, and nothing else. Hence there is nothing apart from pure consciousness. That which does not shine is unreal (*asat*) and that which is unreal can not shine.

आनन्द एवास्ति भाति नान्यः कश्चिदतोऽखिलम् ।
आनन्दघनमन्यन्न विनाऽऽनन्देन विद्यते ।। ९ ।।

9 Bliss alone exists and that alone shines, not anything else. Therefore, the whole world is of the nature of Bliss itself. There is nothing but Bliss.

सर्वं हि सच्चिदानन्दं नेह नानाऽस्ति किञ्चन ।
यः पश्यतीह नानेव मृत्योर्मृत्युं स गच्छति ।। १० ।।

10 Everything is in the nature of existence, consciousness and bliss. There is no duality in Brahman and he who sees plurality in it goes from death to death.

CHAPTER THREE

Asatya Daraśnam—Vision of Non-Truth

मनोमयमिदं सर्वं न मनः क्वापि विद्यते ।
अतो व्योम्नीव नीलादि दृश्यते जगदात्मनि ।। १ ।।

1 This whole phenomenon is the mind-stuff. Actually the mind exists nowhere. For, this world is seen in the Ātman just as the blue etc., in the sky.

मनसोऽनन्यया सर्वं कल्प्यतेऽविद्यया जगत् ।
विद्ययाऽसौ लयं याति तदालेख्यमिवाखिलम् ।। २ ।।

2 This whole world is seen as real by nescience which is not different from the mind-stuff. This *avidyā* (nescience) perishes through knowledge (of the Ātman). Then the world will seem to be a mere drawing.

विजृम्भते यत्तमसो भीरोरिह पिशाचवत् ।
तदिदं जाग्रति स्वप्नलोकवद् दृश्यते बुधैः ।। ३ ।।

3 This world arises from ignorance just as a ghost seems to the coward as emerging from darkness. But the wise man in his wakeful state, sees this world as unreal, like a dream-world.

संकल्पकल्पितं दृश्यं संकल्पो यत्र विद्यते ।
दृश्यं तत्र च नान्यत्र कुत्रचिद्रज्जुसर्पवत् ।। ४ ।।

4 This visible world is seen as a presentiment of the will. Where there is will, there alone is the visible world. Where there is no will there is no world, as the snake is in the will, and not in the rope.

संकल्पमनसोः कश्चिन्नहि भेदोऽस्ति यन्मनः ।
तदविद्यातमःप्रख्यमिन्द्रजालमिवाद्भुतम् ।। ५ ।।

5 There is no difference between the will and the mind. What is called nescience or darkness is nothing but the mind which is as wonderful as *Indrajāla* (the magic of Indra).

मरीचिकावत्प्राज्ञस्य जगदात्मनि भासते ।
बालस्य सत्यमिति च प्रतिबिम्बमिव भ्रमात् ।। ६ ।।

6 To the wise man who discriminates between the Real and the unreal, this world appears as a mirage. Just as the reflected image appears real to the child who has no power of discrimination, the world appears to be real only to the ignorant.

आत्मा न क्षीरवद्याति रूपान्तरमतोऽखिलम् ।
विवर्त्तमिन्द्रजालेन विद्यते निर्मितं यथा ।। ७ ।।

7 The Self never changes into other forms, like milk. Therefore the whole world being non-existent appears as existent (i.e. *Vivarta* of Brahman), as if created by *Indrajāla*.

मायैव जगतामादिकारणं निर्मितं तथा ।
सर्वं हि मायिनो नान्यदसत्यं सिद्धिजालवत् ।। ८ ।।

8 *Māyā* is the prime material cause of the universe. The whole phenomenon is created by *Māyā* which is not different from the *Māyin* (Magician i.e. Īśvara). This world is unreal, just like the various unreal magical effects. Thus this world is non-different from *Īśvara* though it is unreal.

विभाति विश्वं वृद्धस्य वियद्वनमिवात्मनि ।
असत्यं पुत्रिकारूपं बालस्येव विपर्ययम् ।। ९ ।।

9 To the man of mature wisdom, the universe shines in the Ātman like a forest imagined in the sky. It is like the inert unreal puppet which appears to be real to the indiscriminating child.

एकं सत्यं न द्वितीयं ह्यसत्यं भाति सत्यवत् ।
शिलैव शिवलिङ्गं न द्वितीयं शिल्पिना कृतम् ।। १० ।।

10 One alone is Real without a second. The unreal seems to be real. *Śivaliṅga* (the phallic emblem of Siva) is stone itself, not a second made by a mason (Brahman alone is real and this world is unreal.)

CHAPTER FOUR

Māyā Darśanam—Vision of Illusive Relativity

न विद्यते या सा माया विद्याऽविद्या पराऽपरा
तमः प्रधानं प्रकृतिर्बहुधा सैव भासते ।। १ ।।

1 Māyā is that which is not. This Māyā appears in different forms, namely, *vidyā* (knowledge), *avidyā* (ignorance), *parā* (transcendence), *aparā* (immanence), *tamaḥ* (darkness), *Pradhānam* (Prime Potency) and *Prakṛti* (Nature).

प्रागुत्पत्तेर्यथाऽभावो मृदेव ब्रह्मणः पृथक् ।
न विद्यते ब्रह्म हि या सा मायाऽमेयवैभवा ।। २ ।।

2 Before the creation of the pot its negation existed only in the form of clay. In the same way before the creation of this world, what is not different from Brahman, or, what is Brahman itself, is Māyā—the powers of which are unfathomable (immeasurable).

अनात्मा न सदात्मा सदिति विद्योतते यया ।
सा विद्येयं यथा रज्जुसर्पतत्त्वावधारणम् ।। ३ ।।

3 *Vidyā* is that by which Ātman (self) is understood as Sat (Real) and *Anātman* (non-self) as *asat* (unreal). It is just like the real knowledge that helps to discern the rope as a rope and the superimposed snake as unreal.

आत्मा न सदनात्मा सदिति विद्योतते यया ।
सैवाविद्या यथा रज्जुसर्पयोरयथार्थदृक् ।। ४ ।।

4 Avidyā is that which imparts the knowledge that *Ātman* is (asat) unreal and anātman is (sat) real. It is like the erroneous cognition regarding the rope and the snake.

इन्द्रियाणि मनोबुद्धिपञ्चप्राणादयो यया ।
विसृज्यन्ते सैव परा सूक्ष्माङ्गानि चिदात्मनः ।। ५ ।।

5 Parā is that Māyā which creates the subtle organs of self-intelligence (Cidātma) like the senses of cognition and action, the mind, the intellect, the five vital airs, etc.

अङ्गान्येतान्यवष्टभ्य सुखी दुःखीव मुह्यति ।
चिदात्मा मायया स्वस्य तत्त्वतोऽस्ति न किञ्चन ।। ६ ।।

6 The Self-intelligence, by its own *Māyā*, adopting these organs as its own, imagines as it experiences happiness or sorrow. But really there is nothing like that.

इन्द्रियाणां हि विषयः प्रपञ्चोऽयं विसृज्यते ।
यया सैवापराऽध्यात्मस्थूलसङ्कल्पनामयी ।। ७ ।।

7 That *Māyā* by which the gross world which is the very object of the senses is particularly created, is named *aparā*. It is in the self in the form of gross presentiment of the will.

शुक्तिकायां यथाऽज्ञानं रजतस्य यदात्मनि ।
कल्पितस्य निदानं तत्तम इत्यवगम्यते ।। ८ ।।

8 Just as the cause of the superimposed silver on the nacre is ignorance, so the cause of the superimposed world on *Ātman* is ignorance known as Tamas (darkness).

धीयतेऽस्मिन् प्रकर्षेण बीजे वृक्ष इवाखिलम् ।
अतः प्राधान्यतो वाऽस्य प्रधानमिति कथ्यते ।। ९ ।।

9 As the tree exists in the seed, all this world marvellously dwells in it (*Māya*). Owing to this reason, or owing to its importance, it is known as Pradhānam (Prime potent power).

करोतीति प्रकर्षेण प्रकृत्यैव गुणान् पृथक् ।
निगद्यतेऽसौ प्रकृतिरितीह त्रिगुणात्मिका ।। १० ।।

10 The modalities (Guṇas) are diversified in a marvellous way by Māyā by its very nature. This form of *Māyā* is well known as prakṛti (nature) which consists of the three modalities (satva, rajas and tamas).

CHAPTER FIVE

Bhāna Darśanam—Vision of Consciousness

अन्तर्बहिर्विदासीनं सदा भ्रमरचञ्चलम् ।
भानं द्विधैव सामान्यं विशेष इति भिद्यते ।। १ ।।

1 *Bhāna* (consciousness) is that which remains inwardly just as (the objects remain) outwardly and agitates like a bee. It is of two kinds viz., generic (*Sāmānya*) and specific (*Viśeṣa*).

स्थलं सूक्ष्मं कारणं च तुर्यञ्चेति चतुर्विधम् ।
भानाश्रयं हि तन्नाम भानस्याप्युपचर्यते ।। २ ।।

2 The basic *Bhāna* is of four types such as the gross (Sthūla), the subtle (Sūkṣma) the causal (*Kāraṇa*) and the Absolute (Turyam). These names are applicable to *Bhāna* (consciousness) also.

दृश्यतामिह कायोऽहं घटोऽयमिति दृश्यते ।
स्थूलमाश्रित्य यद् भानं स्थूलं तदिति मन्यते ।। ३ ।।

3 That which is known as *Sthūla Bhāna* (concrete consciousness) in the sense of 'I am the body', 'this is the pot', etc. which depends on the gross object.

अत्र कायो घट इति भानं यत्तद्विशिष्यते ।
तथाहमयमिति यत् सामान्यमिति च स्मृतम् ।। ४ ।।

4 Here what is known as the consciousness of the body and the pot is the specific (*Viśeṣa*) *Bhāna* and, the consciousness of 'I' and 'this' is generic (*Sāmānya*).

इन्द्रियाणि मनोबुद्धी विषयाः पञ्च वायवः ।
भास्यन्ते येन तत्सूक्ष्ममस्य सूक्ष्माश्रयत्वतः ।। ५ ।।

5 The sense organs (senses such as hearing etc.), the mind, the intellect, the objects and the five vital airs, are made conscious because they depend on the subtle; and it is known as *Sūkṣma Bhāna* or subtle consciousness.

अज्ञोऽहमिति यद् भानं तत् कारणमुदाहृतम् ।
अत्राऽहमिति सामान्यं विशेषोऽज्ञ इति स्फुरत् ।। ६ ।।

6 The knowledge that 'I am ignorant' is known as causal consciousness (*Kārana Bhāna*). Here that aspect which stands for 'I' is (*Sāmānya*) generic, and that which suggests the sense of the ignorant is specific (*Viśeṣa*).

अहं ब्रह्मेति यद् भानं तत्तुर्यमिति शंस्यते ।
सामान्यमहमित्यंशो ब्रह्मेत्यत्र विशिष्यते ।। ७ ।।

7 The consciousness that 'I am Brahman' is acclaimed as the consciousness of the absolute (*Turya*). Here the element 'I' is the generic and the 'Brahman' (Absolute) is the specific.

यत्र भानं तत्र भास्यं भानं यत्र न तत्र न ।
भास्यमित्यन्वयेनाऽपि व्यतिरेकेण बोध्यते ।। ८ ।।

8 Where consciousness exists, there is the object of consciousness; where consciousness does not exist, there is no object of consciousness. Hence it is known by the agreement (*anvaya*) that where there is the cause there is the effect and the difference (*Vyatireka*) that where there is no cause there is no effect.

यथा दृग्दृशमात्मानं स्वयमात्मा न पश्यति ।
अतो न भास्यते ह्यात्मा यं पश्यति स भास्यते ।। ९ ।।

9 As the 'eye' does not see itself, the Ātman does not see itself. So the Ātman is not indeed the object of consciousness. What the Ātman sees is the object of consciousness.

यद् भास्यते तदध्यस्तमनध्यस्तं न भास्यते ।
यदध्यस्तं तदसदप्यनध्यस्तं सदेव तत् ।। १० ।।

10 The object of consciousness is superimposed. What is not superimposed is not the object of consciousness. What is superimposed is not Real. But what is not superimposed is the Real itself.

CHAPTER SIX

Karma Darśanam—Vision of Action

आत्मैव मायया कर्म करोति बहुरूपधृक् ।
असङ्गः स्वप्रकाशोऽपि निद्रायामिव तैजसः ।। १ ।।

1 Even though the Ātman is self-luminous and detached, it does action, assuming different shapes, through *Māya* (negativity), as the dream agent (*Taijasa*) does in sleep.

मन्वे वदामि गृह्णामि शृणोमीत्यादिरूपतः ।
क्रियते कर्म परमात्मना चित्तेन्द्रियात्मना ।। २ ।।

2 The actions like, 'I think', 'I speak', 'I grasp' and 'I hear', are performed by the Supreme Self (*Paramātman*) which is the self of pure reason (*citta*) and the senses.

आत्मैव कर्मणः पूर्वमन्यत् किञ्चिन्न विद्यते ।
ततः स्वेनैव कर्माणि क्रियन्ते निजमायया ।। ३ ।।

3 Prior to action it is Ātman that exists and nothing else at all. Thus by the Self itself, through its own *Māyā*, all the actions are performed.

शक्तिरस्त्यात्मनः काचिद् दुर्घटा न पृथक् स्वतः ।
तयैवारोप्यते कर्म निखिलं निष्क्रियात्मनि ।। ४ ।।

4 There is the existence of a certain indefinable power which is not different from the Self. By that power itself, all the actions are attributed to the actionless Ātman.

सर्वदाऽसङ्ग एवात्माऽज्ञतया कर्मसङ्गिवत् ।
करोति न करोमीति न ज्ञः कर्मसु सज्जते ।। ५ ।।

5 The Ātman is always detached indeed, but it performs action, as if attached, owing to ignorance. The wise man is not interested in action, knowing that 'I do nothing'.

ज्वलति ज्वलनो वायुर्वाति वर्षति वारिदः ।
धरात्मा सन् धरति खल्वेको वहति वाहिनी ॥ ६ ॥

6 It is the One Ātman that burns as fire, blows as wind, rains as water, supports as the earth, and flows as river.

ऊर्ध्वं प्राणो ह्यधोऽपानः खल्वेको याति निष्क्रियः ।
नाड्यन्तराले धमति क्रन्दति स्पन्दति स्थितः ॥ ७ ॥

7 The One Ātman itself remaining inactive, moves upwards as *Prāṇa* and downwards as *Apāna*. Yet it beats, murmurs and pulsates within the nerves.

अस्ति जन्मर्द्धिपरिणत्यपक्षयविनाशनम् ।
षड्भावमिह यो याति स नान्योऽविक्रियात्मनः ॥ ८ ॥

8 In this world what exists, is born, grows, changes, decreases and perishes, is subject to the six forms of becoming and is nothing other than the actionless Self (Ātman).

स्वयं क्रियन्ते कर्माणि करणैरिन्द्रियैरपि ।
अहं त्वसङ्गः कूटस्थ इति जानाति कोविदः ॥ ९ ॥

9 The actions become self-accomplished through the inner organs and the senses. However the enlightened man knows that he is the unattached, *Kūṭasthaḥ* (changeless).

दृश्यत्वाद्ग्राह्यमहमप्यतोऽहं शुक्तिरङ्गवत् ।
अध्यस्तमेक एवाद्य श्वोपि सर्वोपरि स्थितः ॥ १० ॥

10 Even the ego, being perceptible is the object of consciousness and thus the ego is also superimposed like the shell silver. The One Ātman only remains above all things, and for all times.

CHAPTER SEVEN

Jñāna Darśanam—Vision of Wisdom

ज्ञानमेकं हि निरुपाधिकं सोपाधिकं च तत् ।
अहंकारादिहीनं यज्ज्ञानं तन्निरुपाधिकम् ।। १ ।।

1 The consciousness (*Jñāna*) is unique and unconditioned; it is conditioned, too. The consciousness (*Jñāna*) without egoism etc; is unconditioned (*nirupādhika*) knowledge.

अहन्तयाऽन्तर्बहिरस्ति यदेवमिदन्तया ।
भानवृत्त्याऽन्वितं यत्तु ज्ञानं सोपाधिकं मतम् ।। २ ।।

2 That awareness (*Jñāna*) which accompanies the consciousness of egoism inside, and that of thisness outside, is known as conditioned (*sopādhika*). knowledge.

अनात्मनामहंकारादीनां येनानुभूयते ।
साक्षी तदात्मज्ञानं स्याद्येनैवामृतमश्यते ।। ३ ।।

3 Self-awareness (*Ātmajñāna*) is that witness(remaining within the bodies)by which the non-self effects such as egoism etc., are experienced, and by which even immortality is enjoyed.

अहंकारादि कार्यं यदनात्मकमसंख्यकम् ।
येनावगम्यतेऽनात्मज्ञानं तदवधार्यते ।। ४ ।।

4 The awareness of non-self (*anātmajñāna*) is that by which innumerable non-self effects like egoism etc., are perceived.

यथावद्वस्तुविज्ञानं रज्जुतत्त्वावबोधवत् ।
यत्तद्यथार्थविज्ञानमयथार्थमतोऽन्यथा ।। ५ ।।

5 The knowledge of the things as they are, is the right awareness, like the right knowledge of the rope (in the rope-snake phenomenon). And what is opposite to that is wrong awareness.

यत्सान्निध्यादेव सर्वं भासते स्वयमेव तत् ।
प्रत्यक्षज्ञानमिति चापरोक्षमिति लक्ष्यते ।। ६ ।।

6 By the very presence of which everything becomes bright by itself, is known as perceptual (empirical) and also as non-transcendental awareness.

ययाऽनुसाधकं साध्यं मीयते ज्ञानरूपया ।
वृत्या साऽनुमितिः साहचर्यसंस्कारजन्यया ।। ७ ।।

7 Inferential knowledge is that by which the means to the ends are apprehended through the function of the mind in the form of awareness, arising from the circumstantial attitudes.

गत्वा समीपं मेयस्य मीयते श्रुतलक्षणः ।
यया संवित्सोपमितिर्मृगोऽयमितिरूपया ।। ८ ।।

8 Approaching an object to be ascertained and identifying it in the form of "this is the animal having the marks I have heard about", through the functional basis for certitude (*Vṛitti*)—this is known as analogical awareness.

अहं ममेति ज्ञानं यदिदं तदिति यच्च तत् ।
जीवज्ञानं तदपरमिन्द्रियज्ञानमिष्यते ।। ९ ।।

9 It is said that the knowledge of the individual self (*Jivā-jñāna*) is the awareness of 'I' and 'mine'. And the sense awareness (*Indriyajñāna*) is that of 'this' and 'that'.

ओं तत् सदिति निर्दिष्टं ब्रह्मात्मैक्यमुपागतम् ।
कल्पनादिविहीनं यत् तत् परज्ञानमीर्यते ।। १० ।।

10 That knowledge which is designated as "OM that exists" (*om tat sat*), and has attained to the unity of the individual self (*Jīva*) and the Absolute (Brahman), and which is devoid of willing or other functions, is said to be the ultimate awareness (*Parajñāna*).

CHAPTER EIGHT

Bhakti Darśanam—Vision of Adoration

भक्तिरात्मानुसन्धानमात्माऽनन्दघनो यतः ।
आत्मानमनुसन्धत्ते सदैवात्मविदात्मना ।। १ ।।

1 *Bhakti* is the contemplation of the Self, for, the Self is in the nature of Bliss. So the knower of the Self always meditates upon the Self through the mind.

अनुसन्धीयते ब्रह्म ब्रह्मानन्दघनं यतः ।
सदा ब्रह्मानुसन्धानं भक्तिरित्यवगम्यते ।। २ ।।

2 Brahman is meditated upon, for, It (Brahman) is of the nature of Bliss. Constant meditation on Brahman is known as *Bhakti*.

आनन्दमेव ध्यायन्ति सर्वे दुःखं न कश्चन ।
यदानन्दपरं ध्यानं भक्तिरित्युपदिश्यते ।। ३ ।।

3 All meditate on Bliss, no one meditates on sorrow. That which is the meditation on Bliss is taught to be adoration (*Bhakti*).

आत्मैव ब्रह्म भजति नान्यमात्मानमात्मवित् ।
भजतीति यदात्मानं भक्तिरित्यभिधीयते ।। ४ ।।

4 Ātman alone is Brahman. The knower of Ātman (Self) meditates on the Self, and not on anything else. The meditation on Ātman is said to be *Bhakti*.

आनन्द आत्मा ब्रह्मेति नामैतस्यैव तन्यते ।
इति निश्चितधीर्यस्य स भक्त इति विश्रुतः ।। ५ ।।

5 The Bliss, the Self, and the Brahman are said to be the names of this (*Bakti*). One who has this firm awareness is known as a devotee (*Bhakta*).

आनन्दोऽहमहं ब्रह्मात्माऽहमस्मीतिरूपतः ।
भावना सततं यस्य स भक्त इति विश्रुतः ।। ६ ।।

6 One who has the constant imagination that 'I am Bliss', 'I am Brahman, and 'I am the Self', is well known as a devotee.

भार्या भजति भर्त्तारं भर्ता भार्यां न केवलम् ।
स्वानन्दमेव भजति सर्वोऽपि विषयस्थितम् ।। ७ ।।

7 The wife does not merely adore the husband, nor does the husband merely adore the wife. All depend upon the self-bliss (*Ātmānanda*) which dwells in sense objects.

एवं पश्यति कुत्रापि विद्वानात्मसुखं विना ।
न किञ्चिदपरं तस्य भक्तिरेव गरीयसी ।। ८ ।।

8 Thus the wise man (the knower of Ātman) does not see anything other than self-Bliss. His contemplation is verily the highest.

लोकस्य पितरि स्वस्य गुरौ पितरि मातरि ।
सत्यस्य स्थापितरि च तत्पथेनैव यातरि ।। ९ ।।
नियन्तरि निषिद्धस्य सर्वेषां हितकर्तरि ।
योऽनुरागो भक्तिरत्र सा परा परमात्मनि ।। १० ।

9, 10 Love of the Father of the world, of one's spiritual teacher, father, mother, of the founder of truth and those who follow his path; of those who control others from forbidden actions and of those who do good to all—this love is devotion (*Bhakti*). This devotion to the Supreme Self is said to be Supreme devotion (*Parā-bhakti*).

CHAPTER NINE

Yoga Darśanam—Vision of Unification

सततं योजयति यद्युनक्ति च चिदात्मनि ।
मनोनिरोधरूपोऽयं स योग इति शंसितः ।। १ ।।

1 That which always unites the mind with the consciousness that is Brahman, and which gets united itself with it, and which is in the form of restraint of the mind, is said to be *Yoga*.

न द्रष्टा दर्शनं दृश्यं विद्यते यत्र तत्र हृत् ।
योजयेद्वासना यावद्योगोऽयमिति योगवित् ।। २ ।।

2 Where the seer, the seeing and the seen object are not present, there (in the ultimate Self), the mind, as long as the instincts are present, should be joined. The knower of *Yoga* says that this is the *Yoga*.

नामरूपमिदं सर्वं ब्रह्मैवेति विलीयते ।
यद्ब्रह्मणि मनो नित्यं स योग इति निश्चितः ।। ३ ।।

3 When the mind, knowing that all this world of name and form is Brahman itself always dissolves most in Brahman that (state) is determined as *Yoga*.

चित्तस्य तैलधारावद्वृत्त्याऽविच्छिन्नयाऽऽत्मनि ।
निरन्तरं रम्यते यत्सयोगो योगिभिः स्मृतः ।। ४ ।।

4 The functioning of the mind, which is like a continuous flow of oil from one vessel to another, finds incessant joy in the Ātman. That is recognised by Yogis as *Yoga*.

यतो यतो मनो याति सदाऽऽत्मनि ततस्ततः ।
नियम्य योजयेदेतद्योगोऽयं युज्यतामिह ।। ५ ।।

5 Always the mind should be restrained from wherever it goes, and be related to the Ātman. (*Samādhi* be practiced) This is the yoga; here there is union.

सर्वानर्थकारः पुंसां संकल्पः कल्पितैः सह ।
उन्मूल्य वसनाजालैर्येनात्मनि निरुध्यते ।। ६ ।।

6 After destroying the willing which is the source of all evil together with the objects willed and the various instincts which are the causes of such willing, he should restrain the mind in the Ātman.

दृश्यस्य न दृशोऽस्तित्वमतो दृश्यं दृगात्मकम् ।
इति युञ्जीत दृग्रूपे यः स योगविदां वरः ।।७ ।।

7 What is seen has no existence apart from the seer. It is the seer that has existence and the seen object is himself the seer. One who thus joins the Ātman in the form of the seer is the noblest among the knowers of *Yoga*.

यदा पिबन् मनोभृङ्गः स्वानन्दमधुमाधुरीम् ।
न स्पन्दति वशीकृत्य योजितो योगवायुना ।। ८ ।।

8 When the mind-bee, drawn by the *Yoga*-breeze and united with self-bliss, enjoys the sweetness of its honey without fluttering away from it, then Yoga takes place.

ध्यानमन्त भ्रुवोर्दृष्टिर्जिह्वाग्रं लम्बिकोर्ध्वतः ।
यदा स्यात् खेचरीमुद्रा निद्रालस्यादिनाशिनी ।। ९ ।।

9 When meditation with gaze fixed between eye-brows, and tongue-tip touching beyond the uvula, takes place, then results (the Yogic exercise of) *Khecarīmudra* which will destroy sleep, fatigue etc.

ज्ञानं कर्मेति लोकेऽस्मिन् द्विधा योगः समासतः ।
अनयोर्योगविस्तारः सर्वः परिसमाप्यते ।। १० ।।

10 In this world, Yoga is briefly of two kinds, viz., *Jñāna* and *Karma*. And within these two the whole *Yoga* statement concludes itself.

CHAPTER TEN

Nirvāṇa Darśanam—Vision of Nirvāṇa

निर्वाणं द्विविधं शुद्धमशुद्धञ्चेति तत्र यत् ।
शुद्धं निर्वासनं तद्वदशुद्धं वासनान्वितम् ।। १ ।।

1 Emancipation (*nirvāṇa*) is of two kinds – pure and impure. What is without instinct is pure and what is qualified by instinct is impure

अतिशुद्धं शुद्धमिति शुद्धं च द्विविधं तथा ।
अशुद्धशुद्धञ्चाशुद्धमशुद्धाशुद्धमुच्यते ।। २ ।।

2 It is said that pure emancipation has two sub-divisions, pure and extra-pure. Likewise impure emancipation is of two kinds, impure-pure and impure-impure.

अतिशुद्धं त्रिधा पश्चाद्वरे चैकं वरीयसि ।
एकमेकं वरिष्ठेऽथ शुद्धं ब्रह्मविदि स्थितम् ।। ३ ।।

3 Extra-pure *nirvāṇa* is, again, of three kinds; it exists in the elect knower of the Absolute, the more elect knower of the Absolute, the most elect knower of the Absolute. Then, pure emancipation exists in the knower of the Absolute.

अशुद्धशुद्धं विरजस्तमोऽन्यत्सरजस्तमः ।
मुमुक्षौ प्रथमं विद्याद् द्वितीयं सिद्धिकामिषु ।। ४ ।।

4 The impure-pure emancipation is without passion and inertia; the other (impure-impure) is with passion and inertia. The former exists in one who desires liberation, while the latter exists in one who desires psychic powers.

दग्ध्वा ज्ञानाग्निना सर्वमुद्दिश्य जगतां हितम् ।
करोति विधिवत्कर्म ब्रह्मविद्ब्रह्मणि स्थितः ।। ५ ।।

5 The knower of Brahman exists in Brahman. After destroying everything with the fire of knowledge, he does the action according to the injunctions for the well-being of of all the creatures.

संन्यस्य सर्वकर्माणि सततं ब्रह्मनिष्ठया ।
यश्चरत्यवनौ देहयात्रायै ब्रह्मविद्वरः ॥ ६ ॥

6 He who, renouncing all actions, always rests in the Absolute and continue , arneying in the world only for the movement of the body, is the elect knower of the Absolute.

अन्येन वेदितो वेत्ति न वेत्ति स्वयमेव यः ।
स वरीयान् सदा ब्रह्मनिर्वाणमयमश्नुते ॥ ७ ॥

7 He who, (in the rapture of *nrvāṇa*) is able to know the world only when informed by others, but does not know it himself, is the more Elect who always enjoys Absolute, Nirvāṇa.

स्वयं न वेत्ति किञ्चिन्न वेदितोऽपि तथैव यः ।
स वरिष्ठः सदा वृत्तिशून्योऽयं ब्रह्म केवलम् ॥ ८ ॥

8 He who does know nothing, by himself or even when made to know, is the most elect knower of the Absolute. He is devoid of activities, and is of the nature of Brahamn himself.

हेयोपादेयता नह्यस्याऽऽत्मा वा स्वप्रकाशकः ।
इति मत्वा निवर्त्तेत वृत्तिर्नावर्तते पुनः ॥ ९ ॥

9 Of this world there is nothing to be rejected or accepted; as for the Self, it is self-luminous. Having meditated thus, one should withdraw from all functioning (attain *nirvāṇa*). Thereafter, the function of the mind does not repeat itself.

एकमेवाद्वितीयं ब्रह्मास्ति नान्यन्न संशयः ।
इति विद्वान्निवर्तेत द्वैतान्नावर्तते पुनः ॥ १० ॥

10 The Absolute is one without a second, and nothing else. There is no doubt about this. Having understood this, the wise man should get liberated from duality and thereafter he does not return to it.

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

CC-0. Swami Atmanand Giri (Prabhuji) Veda Nidhi Varanasi. Digitzed by eGangotri

THE AUTHOR



Dr. R. Karunakaran (born in 1927 at Edakkadam, South Kerala) passed the Advaita Vedanta Siromoni Examination from the University of Madras in 1951. He took M.A. and Ph.D from the University of Kerala. In June 1955, he joined the Malayalam Lexicon Department of the same University and then he was appointed Lecturer in Vedanta in July 1959 in the Government Sanskrit College, Trivandrum. He was there as Professor and Head of the Department of Vedanta and Acting Principal. He was also the Professor of Sanskrit, in Sanskrit College, Pattambi. He served as the Principal of Kendriya Sanskrit Vidyapeetham, at Tirupati and Puri, under the Ministry of Education, Government of India. His services there as the General Editor of Āgamakośas and other publications, and as the Head of the Manuscript Library and Research Wing, have been acclaimed by eminent scholars from India and abroad. In 1978 he became Reader in the Department of Sanskrit, University of Kerala. His critical edition of *Darśanamāla* and The *Concept of Sat in Advaita Vedanta* are outstanding contributions to Vedanta literature He is also the Patron of the Sri Sankara Sanskrit Vidyapeetham, Edakkadam, Kerala.

Sri Sankara Sanskrit Vidyapeetham Publications

THE CONCEPT OF SAT IN ADVAITA VEDANTA

DR. R. KARUNAKARAN

Dr. T. M. P. Mahadevan, Emeritus Professor of Philosophy, University of Madras, says:

Sri. R. Karunakaran has produced a thesis which is comprehensive as well as deep. Now that this work will be available in print, scholars will have an opportunity to read it and be helped by it in their understanding of one of the basic aspects of Advaita which is that ultimate Reality—Brahman-Ātman. It gives me pleasure to record my appreciation of Dr. R. Karunakaran's pains–taking and conscientious work.

Dr. A. G. Krishna Warrier, Former Professor and Head of the Department of Sanskrit, University of Kerala, comments:

It is a pleasure to commend Dr. Karunakaran's work as a well conceived, and thought–provoking treatise on a significant theme in Advaita Vedanta. A very pleasing feature of this book is Dr. Karunakaran's warm admiration for Sankara's personality.

Dr. V. K. Sukumaran Nayar, Vice-Chancellor, University of Kerala, observes:

Dr. R. Karunakaran, is fully competent to make his penetrating study of Vedanta Philosophy. His mastery of Sanskrit works and Indian Philosophy is evident to any one who attempts to read his book. He has rightly emphasised the leading role of Śaṅkara as the great exponent of Vedanta Philosophy.

Deluxe Edition Rs. 90.
Popular Edition Rs. 50.

Main Distributors,
SRI SANKARA SANSKRIT
VIDYAPEETHAM PUBLISHERS,
H. O. SRI SANKARA BHAVAN, PETTAH P. O.,
TRIVANDRUM, S. INDIA.